CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T. No. 663

21. F. 41 1 68023

141 141

(8)

" जीर्णोद्धारदशकम् "

" सव्याख्यानम् "

" श्री महागणपतये नमः। श्री गुरुदक्षिणामूर्तये नमः॥

श्रीमच्छैवागमाम्भोधिमवगाह्य कृतं मया।
जीर्णोद्धारस्य दशकं व्याख्यार्थं विस्तरादहम् ॥

तत्र प्रारिप्सित दशकस्य निर्विघ्नेन परिसमाप्त्यै गणेशमनुष्टुप् वृत्तेन स्तौति।

श्रीमच्छंभुमहीपाल गोपुराद्यंगभूषणम्।
देवः कारकराहीति देयाद्भूयश्शुभानि नः॥

श्रीमत शम्भोश्शम्भुनामकस्य महीपालस्य राज्ञो यत्। गोपुरं अरुणाचलालयस्थं शंभुराजगोपुरमिति यावत्। तस्य पश्चाद्भागं अधिष्ठानं तस्य भूषणालंकार भूतः भूषणशब्दो नित्यनपुंसकः। प्रथमान्तः। कार करग्राहीति प्रख्यातो देवः विनायकः नः अस्माकम् भूयः अधिकं शुभानि मङ्गलानि देयात् ददात्विति। अरुणाचलालये स्थित्वा इदं जीर्णोद्धारग्रन्थं कृतमिति ध्वनितम्॥

अथ इष्टदेवतानमस्कारपूर्वकं चिकीर्षितं प्रतिजानीते

नत्वा शिवं पशुपतिं स्वगुरुं च देवीं
वाचामनन्तशुभ (बालु) - - विभव प्रदात्रीम्।
नानागमार्थवचनैर्वि(विधुवा)(विद्यामितन्या)
जीर्णोद्धृतिं विरचयामि शुभाय शैवीम्॥

शिवं तत्वातीतं मुक्तात्मनामपि शिवत्वानन्यमार्गस्थं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

धारयति। पशुपतिमिति। पशूनां पशुत्वमवरुद्धाना-
मात्मवर्गाणां पतिं रक्षकमित्यर्थः। शिवत्वेव
२०/८ पञ्चकारित्वं वा मुक्तात्मनामिति भावः। स्वगुरुं
स्वानुग्राहकं च अनन्तशुभवाग्विभवप्रदात्रीं अविच्छिन्न-
निर्मलधारप्रचारदायिनीं वाचां गिरां देवीं च
नमस्कृत्य शैवीं जीर्णोद्धृतिं विरचयामीत्यन्वयः।
कीदृशीं विबुधाभिनन्द्यां विद्वत्संतोषामविद्वा-
नाभिनन्दनवगाहक्लेशेन दोष इति भावः। अस्य
दशकस्य मूलप्रमाणमप्याह नानागमोत्थवचनैः
कुलामोपागमसम्भूतवचनैः शात्वेति शेषः। फलं
दर्शयति शुभायेति। शुभं भुक्तिमुक्त्यात्मकं पुरुषार्थं
तत्सिद्ध्यर्थमित्यर्थः। जीर्णोद्धारस्य शिवलोकादिप्राप्ते
श्रूयमाणत्वादिति भावः। विरचयामीत्युक्तम्।
पुरुषकृताहंकारशमनाय दशकं कर्ता स्वविनयं दर्शयति,
ब्रह्मादि दुर्ग्रहमपीह। शिवागमार्थजालं

जिघृक्षुमपि मां न हसन्ति सन्तः।

किं निम्नगाजलतरङ्गचन्द्रबिम्बा-

दानप्रसारितकराञ्शिशुरीति निन्दाम्॥

इह सन्तः सत्पुरुषाः ब्रह्मादिदुर्ग्रहं ब्रह्मविष्णु-
प्रमुखैरपि ग्रहीतुमशक्यं शिवागमार्थजालं कामिका-
द्यागमार्थसमूहं जिघृक्षुं ग्रहीतुमिच्छुमपि न हसन्ति
न परिहसन्ति। परिहासाभावं दृष्टान्तरूपेण द्रढयति।
किमिति निम्नगाजलतरंगचन्द्रबिम्बादानप्रसारितकरः।
निम्नगा नदी। तस्याः जलं तत्र चलतरंग ऊर्मिः तद्गतं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

2a चन्द्रबिम्बं शशिमण्डलं तस्य प्रदाने ग्रहणे प्रसारित-
करः प्रवर्तितहस्तः शिशुर्बालः निन्द्यां गर्ह्यां दशां किं
प्राप्नोति किं न प्राप्नोतीत्यर्थः। अहमपि बालकवत्
न निन्द्योऽस्मीति भावः॥

ननु जीर्णोद्धारस्य फलं पुरुषार्थहेतुत्वमित्याशंक्याह
सकलदर्शनसिद्धान्तानुरोधेन मोक्ष एव परमपुरुषार्थ
इति सिद्धान्तस्य च तत्तन्मतानुसारेण बहुविध-
मुक्तत्वात्तेषु तत्वाराधिनां तत्तत्पदप्राप्तिरूपत्वा-
च्छैव मोक्षस्यैव पुनरावृत्तिरूपत्वेन सर्वोत्कृष्टत्वम्।
तदुक्तम् सिद्धान्तसंग्रहे त्रिलोचनशिवाचार्यैः।

पार्थिवाः कालिका ज्योतिश्शास्त्रज्ञाश्चैव मौतिकाः।
तन्मात्रासिद्धा स्मार्ताश्च चक्षुरादीन्द्रिये परे।
वैशेषिकास्त्वहंकारे मनसि न्यायवादिनः।
बुद्धितत्वे स्थिता बौद्धा गुणेष्वार्हता स्थिताः।
प्रकृता पाञ्चरात्रज्ञा मन्यन्ते प्रकृतिं हरिम्।
वेदान्तज्ञाश्च सांख्याश्च योगिनः पुरुषे स्थिताः।
पाशुपतास्तु मायायां विद्यायां तु महाव्रताः।
शाक्तितत्वे तदद्वैतो शिवतत्वे परे स्थिताः। इति
मृगेन्द्रे - इत्याद्यज्ञानमूढानां मतमाश्रित्य दुर्धियः।
अपवर्गमभीप्सन्ति खद्योतात्पावकार्थिनः॥

यत्नैर्बलं पुंप्रकृत्योर्विवेका-
त्सर्वं ब्रह्म मत्वा विरामः।
या ना काश्चिन्मुक्तयः पाशजन्या
स्तास्ता सर्वा भेदमायान्ति दृष्टौ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शैवे लिङ्गे भाति भूभीतरेषां
मुक्ताभृष्टौ पुंवरेभ्येति नान्यः।
विज्ञानत्वान् स्वेन शिक्षाम्यपदाम्ना
२८ सर्वेशानामीशिता स्वर्वदाते ॥ इति।

सा च शैवी भक्तिः शिवभजनं विना न सम्भवति।
शिवभजनश्च शिवक्षेत्रवास शिवभक्तपूजन शिवार्चन शिवालयादि निर्माणजीर्ण शिवालयाद्युद्धाररूप इति तदिदं लिङ्गाय। जीर्णोद्धार-रूप शिवधर्मस्यावश्यकर्तव्यतां दर्शयति। यत्संसारविरक्ति-मांस्पुरुषसंसारविच्छित्तये त्यक्त्वान्यत्पशुधर्मजालमार्दवेलं सेवेत देवं शिवम्।

कुर्याद्वा सम्यक् - पक्षेषु महाक्षेत्रेषु देवस्य तत्-भक्ताराधन तत्समर्चन तदावासादि जीर्णोद्धृतिम् ॥

यः पुरुषः संसारविरक्तिमान् अनेकजन्ममरण रूपसंसारात्दुःखानुभव जनितनिर्वेदाद्विरक्तिमान् भवति। यथा मोहमुद्गरे-

पद्मपत्रे यथा तोयं वातोद्धूतं सुचञ्चलम्।
तद्वदिदं चञ्चलं चक्रं प्राणिनां बुद्धिजीवितम्।
अस्थिरं यौवनं शक्र रूपमस्थिरमेव च।
अस्थिरं पुत्रपौत्राद्यं संसारमखिलं यतः।
तस्मात्पुत्रकलत्राणि क्षेत्राणिमित्रधनानि च।
विहाय मोहजालानि कुर्यात्लिङ्गं परिग्रहम् ॥ इति।

संसारविच्छित्तये संसारस्यात्यन्तिक निवृत्तिरूपपरमशैव मोक्षाय अन्येषां तन्न्यूनत्वात्। अन्यदार्वेलं पशु-धर्मजालं व्रतोपवासदानादिरूपम्। स्वर्गमयत्वात् तत्त्यक्त्वा। देवं दीव्यति मोदते नित्यानंदमनुभवतीति देवः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दिवु क्रीडा विजिगीषा व्यवहार द्युति स्तुति मोद मद स्वप्न-
कान्तिगतिष्विति धातोरानन्दार्थत्वात् । वशति
इति शिवः । नित्यं सुखवानिति वा । वशकान्ताविति
3a धातोः शिवशब्दो निष्पन्नः । तदुक्तमागमे पूर्वैः
शिवि धातोः लिंगशब्दो वशकान्तादिशीव स्मृतः ।
वर्णव्यत्ययतः सिंहः पश्यकः कश्यपो यथेति ॥
तमेव सेवेत । तदुक्तं सुप्रभेदे

शिवधर्मात्परो धर्मो न भूतो न भविष्यति ।
पशुधर्मेष्वनेकेषु स्वर्गं शिवफलं हि तत् ।
शतादि शिवधर्मेषु भुक्तिमुक्तिफलप्रदम् ।
सर्वशास्त्रं समुत्सृज्य शिवशास्त्रेषु योजयेदिति ।

तथा शिवधर्मोत्तरे –

व्रतानि दानानि तपांसि यज्ञास्सत्यानि तीर्थाश्रमकर्मयोगाः ।
स्वर्गायमेतत्सुखमध्रुवस्य ज्ञानं शुभं शान्तिकरं महार्थम् ।

अजितागमे –

आदिमध्यान्तनिर्मुक्तस्स्वभावविमलः प्रभुः ।
सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयश्शिवागमे ।
दिक्कालाद्यनवच्छिन्नो वाङ्मनातीतगोचरः ।
निष्कलो निष्क्रियश्चैव सर्वदृक्सर्वगस्सदा ।
तज्ज्ञानादेव मुक्तस्स्यात् तद्भक्त्या वा जनार्दन ।
तत्पूजयापि ददात्येवं फलमिन्द्रपदादिकम् ।
पूजितो देवदेवेशो भक्तिं ज्ञानं प्रयच्छति ।
ज्ञानेन भक्तियोगेन विनान्यैः कर्मकोटिभिः ।
प्राप्यते न क्वचिन्मुक्तिः तस्माल्लिंगार्चनं परम् ।
लिंगार्चनात्समो नास्ति धर्मो ग भुवनत्रय इति ।

तत्रैव च शिवक्षेत्रवास शिवभक्ताराधन शिवार्चन शिवालय

Center for Shaiva Studies, Pondicherry Collection

निर्माण तज्जीर्णोद्धार तत्स्वरूपेण पञ्चधा भवति। तत्र
शिवक्षेत्रवालाष्टषष्टिस्वयंभूस्थानेषु बाल:। तदुक्तं
स्कन्दकालोत्तरे :

अष्टषष्टि महाक्षेत्रं स्वयंभूस्थानमुच्यते।

36 रुद्रावतारस्थानानि स्वयमुक्तकानि चेति॥

अष्टषष्टिस्थानानि वीरतन्त्रे प्रतिपादितानि।

स्थानानि चाष्टषष्टि वा शृणुताव तपोधन।
वाराणस्यां महादेवं प्रयागे तु महेश्वरम्।
नैमिषे देव देवेशं गयायां प्रपितामहम्।
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे शशिभूषणम्।
पुष्करे ह्ययोगन्धं विश्वेशं विमलेश्वरे।
अट्टहासे महानादं महेन्द्रे तु महाव्रतम्।
उज्जयिन्यां महाकालं मधुरे तु महोत्कटम्।
शंकुकर्णे महातेजा गोकर्णे तु महाबलम्।
रुद्रकोट्यां महायोगं महालिंगं स्थलेश्वरे।
हर्षके हर्षकश्चैव विश्वमध्ये महेश्वरम्।
केदारे च महेशानं वृषे च वृषभध्वजम्।
स्वर्णाक्षे च सहस्राक्षं भैरवे भैरवाकृतिम्।
कपर्दिनं तु कारुण्ये भवं भद्रावटे विदुः।
रुद्रं खनरखले चैव भद्रकण्ठे सदाशिवम्।
देवदारुवने दण्डिं चण्डीशं कुरुजांगले।
शान्तिवालामकष्टे सूक्ष्मस्थामृतकेश्वरे।
कालञ्जने नीलकण्ठं श्रीकण्ठं विमलेश्वरे।
सिद्धेश्वरे स्थानगञ्च गायत्रं मुक्तकेश्वरे।
विजयश्चैव काश्मीरे जयन्तं नकुटेश्वरे।
भूतेश्वरे भस्मकायं जल्पेशे तु त्रिशूलिनम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यमलिंगं वृषस्थाने करवीरे कपालिनम् ।
त्रियम्बकं त्रिसन्ध्ये च विरजायां त्रिलोचनम् ।
दीप्तमर्केश्वरे ज्ञेयः नेपाले तु पशोः पतिम् ।
कारोहणे तु लकुलिमम्बिकायामुमापतिम् ।
गंगाब्धियोगे त्वमरमोंकारममरेश्वरम् ।
हरिश्चन्द्रे हरं प्राहुः क्रूरचन्द्रे तु शंकरम् ।
4a वामेश्वरे तु जटिलं सौम्यं श्री मकुटेश्वरे ।
सप्तगोदावरे भीमं नारवले तु स्वयंभुवम् ।
कर्णिकारे गणाध्यक्षं कैलाले त्रिपुरान्तकम् ।
हेमकूटे विरूपाक्षं भूर्भुवं गन्धमादने ।
गङ्गाधरं हिमगिरौ वनलं वडवामुखे ।
दानवारिं मध्यार्थे च वाराहं विन्ध्यपर्वते ।
उग्रं कोटीश्वरे तीर्थे वरिष्ठमिष्टकापुरे ।
तं नामच्युतं प्राहुः पाताले हाटकेश्वरम् ।
लिंगेश्वरे तु वरदं जललिंगं गजाह्वये ।
अष्टषष्टि नामानि यथाप्रोक्तानि तेषु ने ।

इत्यादि स्वायंभुवाद्यादिस्थानेषु वासं कुर्यात् । तत्रैवान्यैषामपि स्थानानां वासाय स्थलविशेषस्सुप्रभेदे प्रतिपादितः।

लिंगाद्धस्तशतं सार्धं शिवक्षेत्रं समन्ततः।
अत्र तत्रैव वासित्वं शिवलोकस्य कारणम् ।
यत्तु मानुषकं लिंगं क्षेत्रमानमिदं स्मृतम् ।
स्वयंभुवे सहजं स्यादार्षे चैव तदर्धकम् ।
आराधने च सर्वाणि स्थावराणीतराणि च ।
दिव्यं त्रियान्यलं देवः प्रभवात्परमेष्ठिनः ।
(सावजदं)
तस्मादावसथं कार्यं शिवक्षेत्रसमीपत इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(विशेष)

सर्वज्ञानोत्तरे शिवक्षेत्रे प्रमाणेपि विशेष उक्तः।

~~शिवक्षेत्रे प्रमाणेपि~~

लिंगाद्दण्डशतं क्षेत्रमाचार्य स्थापिता भवेत्।

द्विसहस्रं स्वयं भूते गणपिजन्तु सहजकमिति।

अंशुमत्काश्यपे –:

पौरुषादार्षकं श्रेष्ठं आर्षकाद्बाणजं वरम्।

गाणपाद्दैविकं श्रेष्ठं तस्मात्स्वायंभुवं वरम्।

क्षेत्रमाहात्म्यमाख्यातं कोटिवृद्धयुत्तरं फलम्।

कल्पितं तत्पदद्वयेषु अनुकर्म द्विजोत्तमः।

कालोत्तरे –:

रुद्रावतारवर्णानि स्वायंभुवविनोर्दिशेत्,

व्रतानां तेषु सर्वेषु शिवक्षेत्रेषु देहिनाम्।

भूलोके च महालेन स्वायंभुल्यानतत्फलम्।

अर्चनञ्च जपोस्थानं समाधिस्थानमेव च।

अक्षयं फलमाप्नोति मृतौ सायुज्यमाप्नुयात्॥ इति।

तथाआदित्य पुराणे –:

क्रोशमात्रं शिवक्षेत्रं समन्तात्परमेष्ठिनः।

देहिनां तत्र पञ्चत्वं शिवसायुज्यकारणम्।

मनुष्यस्थापिते लिंगे क्षेत्रमानमिदं स्मृतम्।

स्वायंभुवे योजनं स्यादार्षे चैव तदर्धकम्।

पापाचारेपि यो नित्यं निरताः मनुजा भुवि।

तेपि यान्ति शिवस्थानं दैवैरपि सुदुर्लभम्।

तस्मादावसथं कुर्याच्छिवक्षेत्र समीपतः॥ इति॥

सूतसंहितायाम् विष्णुं प्रति शिववचनम्।

पापिष्ठानामपि ब्रह्मादि हीनानां जनार्दन।

मुक्तिर्दं सर्वजन्तूनां शिवक्षेत्रेषु वर्तनम्। इति।

Center for Shaiva Studies, Pondicherry Collection

जन्मान्तरसुकृतवशादेतादृशभोगवाले सति तत्कृता-
रम्भणं तत्समर्चनं दीक्षापुरस्सरं गुरुदत्तलिंगादा-
वात्मार्थपूजा तदावाहनादीनां शिवालयप्रासादावरण-
मण्टपादीनां लिंगबेराणां च मध्ये जीर्णस्योद्धृति
नवीकरणञ्च कुर्यात्। तथाचाग्नेय पुराणे।

बेरलिंगं विमाने च भूतपीठे शिवालये।
शीर्णजीर्णेहितो नित्यं न कार्यस्तत्रसंशयः।
विमानबेरावरणानि शम्भोः
बृहद्बृहं →उत्तमं प्रियं च।
अथांगुलारत्नि वितस्तिभिर्वा
विमानपीठध्वज वाहना :- ॥ ?

5a सुधाविलेप सुरभिं स्वधाम्नां
सुधावगाहाय परेत्वभूयात्।
निर्माणमादौ महते फलाय
चतुर्गुणा जीर्णसमुद्धृतिस्स्यात्।
प्रधानबेरोत्सवबेरधाम्नां
प्रासादसर्गो पुरमण्टपानाम् ॥
फलं सहस्राधिकमाद्यमादौ
पश्चात्परं जीर्णमथो विधातुः।
मृद्दारुपाषाण सुधेष्टकाभि
र्विमानप्राकारालयगोपुराणि।
विधास्यतां पुण्यफलं प्रदिष्टं
शताधिकं पूर्वफलात् क्रमेण।
क्षणं क्षणार्धं यो मर्त्य इशीव कार्यं परो भवेत्।
दिव्यं वर्षं शतं यावत् शिवलोके महीयते।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निष्कं निष्कार्धमात्रं वा वित्तं देवार्थमर्पयेत् ।
गोसहस्रफलं लब्ध्वा शिवलोके महीयते ।
भक्त्या वित्तानुसारेण देव ब्राह्मणतर्पणे ।
प्रदातव्यं हि यत्नेन यावज्जीवायशुभक्षयः ।
यावदब्दानि मनः क्रिमिश्चरन्नोन्द्रिय चूर्णिताः ।
तावच्छिवाय दातव्यं यावन्नीवायुषं क्षयः ।
सर्वस्मादधिकं स्वायुः शिवकार्ये नियुञ्जकः ।
न विद्मः किं फलं तस्य भवबन्धविमोक्षतः ।
शिवकार्ये विचारे च शिवद्रव्यापहारकः ।
रौरवं नरकं यान्ति यावदाभूतसंप्लवम् ।
शिवस्वामीति विज्ञाय क्रिमिरप्युपयुञ्जतः ।
मक्षिका दृष्टिमात्रा च निरयं व्यपहृतं समाः ।
अज्ञानात्पादमात्रं तु मक्षिकाया शिवस्य तु ।
भुञ्जीत स्वयं हीना क्वापि महाघोरं शतं समाः ।
सर्वं द्रविणसम्पत्तिर्येषु संदृश्यते भुवि ।
56 पूर्वजन्मनि ते नूनं शिवकार्योपकारिणः ।
न्यूनत्वं दृश्यते येषु पाणिपादाक्षिकुक्षिषु ।
पूर्वजन्मनि ते नूनं शिवकार्यविघातिनः ।
यस्य स्त्रियो मनोज्ञाङ्ग्या जघनस्तनशालिताः ।
प्रतिमारूपको नूनं पूर्वजन्मनि मानवाः ।
वाजिनो यस्य मत्तङ्गा वरनार्यश्च सम्पदः ।
पूर्वजन्मनि संश्रीमान् शिवकार्यपरायणः ।
प्राकारगोपुरोद्यानवाला मण्टपकारिणः ।
नगरग्रामराष्ट्राणां पतयस्तेषु नरा भुवि ।
रुक्मकेशाल्पललाटाश्च सुदृशस्सुदतो नराः ।

Center for Shaiva Studies, Pondicherry Collection

शिवकार्यरता जाते पूर्वजन्मनि मानवाः।
स्फुरत्खलुपदा जंघा शुभाङ्गुलयो नराः।
शिवकार्यपरा नूनं पूर्वजन्मनि ते ध्रुवम्।
मूकाश्च बधिराः काणाः पंगवः कुब्जदेहिनः।
ते निश्चितं विनेत्राश्च शिवकार्यविघातिनः।
अन्यधर्मैस्समान् स्मृत्वा यश्शिवधर्मांस्तु ये नराः।
ते यान्ति नरकान् घोरान् मरुभूमिषु वृक्षताम्।
शिवधर्मान्विनिन्दन्ति शिवभक्तान्हसन्ति ये।
मरुदेशे द्रुमास्ते स्युर्बहुकण्टः तत्वचः।
शिवार्थं शिवभक्तार्थं शिवकार्यपरो भवेत्।
दिङ्नागमुदितं स्युस्तु शिवधर्मप्रवृत्तये।
शिवधर्मोऽप्यशेषेण वक्तुं शक्यं न सूरिभिः।
धर्मस्सूक्ष्मो न बोद्धव्यो गुह्यार्थो महनस्मृतः।
शिवधर्मो हितोऽत्यन्तं दुर्बोधो महतामपि।
तस्मात्सर्वप्रयत्नेन शिवकार्यपरो भवेदिति

शिवधर्मे —:

मृद्दार्विष्टकपाषाणैर्यः कुर्याद्भवनं नरः।
6a त्रिसप्तकुलसंयुक्तः शिवलोके महीयते।
मृण्मयात्कोटिगुणितं पुण्यं स्याद्दारुभिः कृते।
कोटिकोटिगुणं पुण्यं मृत्काष्ठादिष्टकामये।
मृच्छैलयोस्समं शैवं फलमाढ्यदरिद्रयोरिति।

शिवधर्मोत्तरे —:

स्थपतिस्थापको वृद्धा बलीवर्दाश्च कर्मिणः।
यान्ति रुद्रपदं सर्वे तदध्यक्षाश्च ये नराः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ये चात्र वृत्तिभूतकाः शिवायतनकर्मणि ।
तेऽपि यान्ति कृतात्स्वर्गं शिवधर्मानुभावत इति ।

सुप्रभेदे —

इष्टका शैललोहैर्वा यः कुर्याद्भवनं नरः ।
काञ्चनेन विमानेन शिवलोके महीयत इति ।

कालोत्तरे —

जीर्णोद्धारे कृते भूयः प्राप्यते मौलिकं फलम् ।
अजीर्णं भेदयेद्यत्नाज्जीर्णं नैव च धारयेत् ।
शिवधर्मो हि नीत्यन्तं दुर्बोधो महतामपि ।
अजीर्णमुद्धरेद्यो वा मोहादज्ञानतोऽपि वा ।
पच्यते नरके घोरे महाकल्पायुतत्रयम् ।
तस्मात्सर्वप्रयत्नेन त्वजीर्णं पालयेद्बुधः ।
जीर्णादिदोषदुष्टं यल्लिङ्गं स्थानालयं मम ।
तदाश्रिता महाभूताः पिशाचा ब्रह्मराक्षसाः ।
बेतालक्षेत्रपालाश्च ज्वरापस्मारकादयः ।
दुर्भिक्षं दुर्जयं मारी दुःस्वप्नं दुर्निमित्तकम् ।
प्रजापीडागर्भपीडा नृपपीडा द्विजादिषु ।
निर्घातवातसर्पादि भयं देशे प्रजायते ।
परराष्ट्रभयं तत्र यत्र जीर्णो महेश्वरः ।
महेश्वराश्रितास्तस्य दुर्बलयान्ति समं ततः ।
68 गावः क्षीरविहीनाः स्युर्जायते कलहो महान् ।
पशुमारी जनमारी च नाशस्सस्येषु जायते ।
एवमादीनि चान्यानि दुष्टानि प्रभवन्ति हि ।

कामिके — जीर्णादिदोषसंयुक्तं पूजायुक्तं च ज्वलितम् ।
जीर्णोद्धारे कृते कर्तुर्मौलिकं फलमेष्यते ।

Center for Shaiva Studies, Pondicherry Collection

जीर्णाद्यं पूजितं हन्ति निहन्त्येवमपूजितम् ।
तस्मात्तत्समुद्धरेज्जीर्णं यथा शास्त्रं सुरेश्वर च ।
इति मोहशूरोत्तरे ।
जीर्णे त्विति सत्कर्तुः मौलि तन्तु फलं यतः ।
ततो जीर्णं समुद्धृत्य गुणवद्भिर्नवं सुधीः ।
महाभयकरं जीर्णमाद्यन्तः क्षरत्व यत ।
दोषं करोति बहुधा राष्ट्रे राजानि सर्वथा ।
दुष्टलिंगं स्थितं राष्ट्रे प्रजामारी निरन्तरम् ।
राजानो दुःखशोकार्ता क्षीयन्ते बलवाहनैः ।
सूक्ष्मे - प्रमादे जीर्णितैलिंगैः पूजा नैवेद्य कानि च ।
उत्सवादीनि सर्वाणि कुर्यात्प्राक्सालयदम् ।
अजिते - जीर्णलिंगं तु बेरं वा यत्र देशे तु पूज्यते ।
तत्रानावृष्टिर्जायते वर्तते नात्र संशयः ।
तस्मात्सर्वप्रयत्नेन जीर्णमुद्धृत्य कारयेदिति ।
ननु जीर्णलिंग बेरादिगता शक्तिः कुत्र गच्छतीति चेदुक्तम् ।
कारणे - अधिक ग्रहणार्थं प्रोक्षे भरे चलति पाशवत ।
त्रात्वार्कमण्डलं शक्ते जीर्णलिंगस्य तिष्ठतीति ।
सूक्ष्मे समाधानमुक्तम् ।
बेरालयगता शक्तिर्वर्तते सादित्यमण्डले ।
द्वादशाब्दावसाने तु शिव शक्तिर्विलीयते ।
तदूर्ध्वं स्थानशक्तिश्च गच्छते परमे पदे ।
अन्यालयमिति प्रोक्तं सर्वदोषसमुद्भवम् ।
तस्मादुद्धारणं कुर्याच्छास्त्र दृष्टेन कर्मणा ।
7a कर्षणादिप्रतिष्ठान्तं यन्नवीकरणं कुरु ।
सर्वज्ञानोत्तरे - अज्ञात्वा विधिवच्छास्त्रं कुरुते यस्तु लोभतः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

कर्तारञ्च तथात्मानमित्यमुत्र च नाशयेत् ।
तस्माल्लब्धप्रयत्नेन विधिवत्कारयेद्बुधः ।
कर्ता कारयिता चैव यतो याति पराङ्गतिमिति ।
इत्याद्यनेकागमपुराणवचनैरितरशिवकार्यापेक्षया
जीर्णोद्धारस्य चतुर्गुणफलदत्वं शतगुणफलदत्वमकरणे
प्रत्यवायश्च प्रतिपादितं इत्युपोद्धातः ॥
इदानीं विभवनिश्चयपूर्वं सामान्येन तत्प्रकारमाह ।
शैवश्रीज्ञाननिर्वाणभक्तपरमेशार्यादि पुण्यावली
शुद्धान्तःकरणो नरस्स्वविभवं कृत्वा त्रिभागं मुदा ।
भागैकमात्मजीवनकृते वित्तस्य भागद्वयं
तत्पुण्येऽहनि ताम्रपात्रनिहितं कृत्वा शिवायार्पयेत् ।
शैव श्रीज्ञाननिर्वाणः पूर्वोक्त अष्टषष्ट्यादिशिवश्रीज्ञाननिर्वाणः
भक्तपरमेशार्यां शिवभक्तलिङ्गार्चनं तदुभयमादिर्यस्याः
पुण्यावल्याः फलतया शुद्धं परिपक्वमन्तःकरणं मनो यस्य
सः तथोक्तः नरः पुरुषः अनेकजन्मान्तरसुकृतवशादेव
शिवकार्ये प्रवृत्तिर्भवति नान्यथेति भावः । स्वविभवं
76 स्वकीयधनं त्रयोभागा यस्य तत्त्रिभागं मुदा एतादृश
भाग्यं मम सञ्जातम् । खल्विति भक्त्युपबृंहित
सन्तोषेण कृत्वा तत्रैकभागमात्मजीवनकृते आत्मजीवनार्थं
वित्तस्य अन्यद्भागद्वयं पुण्येऽहनि पुण्यदिवसे ताम्रपात्र
निहितं कृत्वा शिवायार्पयेत् । शिवकार्यार्थं विनियुञ्ज्यात् ।
तदुक्तं शिवधर्मे :-

भक्त्या वित्तानुसारेण कुर्यात्प्रासादसञ्चयम् ।
अल्पे महति वा तुल्यं फलमाढ्यदरिद्रयोः ।
वित्तशाठ्येन यः कुर्याद्धर्मं नाढ्योऽपि मानवः ।
स न तत्फलमाप्नोति प्रलोभाक्रान्तमानसः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्मात् त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत्।
भागद्वयञ्च धर्मार्थं यतो नित्यं हि जीवितम्।
अल्पया श्रद्धया दत्तः कुर्याद्वल्पवित्तोऽपि मानवः।
महाविभवजातोऽपि न कुर्याद्भक्तिवर्जितः।
सर्वस्वमपि यो दद्यात् जीवे भक्तिविवर्जितः।
न तेन धर्मपुण्यस्य भक्तिरेवात्र कारणमिति।
तथा च सुप्रभेदे –
वित्तं शिवात्मकं ज्ञात्वा शिवमाराधयेन्नरः।
वित्तशाठ्येन यः कुर्याद्धर्मकार्याणि मानवः।
न तत्फलमवाप्नोति प्रलोभाक्रान्तमानसः।
तस्मात् त्रिभागं वित्तस्य जीवनार्थमथात्मनः।
भागद्वयं च धर्मार्थमनित्यं जीवितं यतः।
स्थापयित्वा च तत्पूर्वं ताम्रपात्रफलापितमिति।
मोहशूरोत्तरे –
8a कालाग्निवरे महेन्द्रे वा सह्ये वा मलयेऽपि वा।
गङ्गातीरे समुद्रे वा श्रीशैले सरितां तटे।
पत्रपुष्पफलोपेते कुक्कुशादिविवर्जिते कर्म।
महेश्वरजनाकीर्णे सर्वदोषविवर्जिते।
स्नात्वा च शुभक्षणे शुभयोगकरणान्विते।
संपूज्य देवदेवेशं कुर्याल्लिङ्गधारिग्रहमिति।
शिवाचार्येणोदितयत्नेन शिवकार्ये शिवकार्ये विनियुञ्ज्यात्।
शिवकार्यञ्च शिवालयाद्युद्धारं विवक्षितम्। तथा निश्वासे –
लिङ्गं पीठञ्च वेश्मं प्रासादं बालपीठकम्।
मण्टपं परिवारञ्च जीर्णमाले समुद्धरेदिति।
तथा काश्यपे – लिङ्गं वा प्रतिमां हर्म्यं मण्टपं गोपुरं तु वा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्राकारं परिवारं वा यै जीर्णादित्तेन लक्षणाः।
तेन प्रकारेण योत्कृष्टैः कर्तव्याः पूर्ववन् दैशिकैः।
कारणे: लिंगस्य पिण्डिकायाश्च प्रतिमायवस्तस्य च।
तरुणालयस्य लिंगस्य परिवारालयस्य च।
प्राकारस्यापि चान्येषा उद्धारे योऽत्तमां क्रियामिति।
अत्र जीर्णोद्धारस्योद्देशं विभागं च करोति।

जीर्णोद्धारविधावं प्रथममभिहितस्त्वालयादेस्तथाद्यो
लिङ्गादेस्तु द्वितीयस्तदनु शिवतनुबेरकादेस्तृतीयः।
तत्राद्ये स्थलभेदाः पुनरपि गदितास्ता द्वितीयेऽष्टसंख्याः
४८ ख्याताः पश्चात् (द्वौ) तृतीये (१६) शिवमतवचनैः षट्प्रभेदाः क्रमेण॥

अथ प्रतिपाद्यो जीर्णोद्धारः प्रथमं त्रिधा त्रिप्रकारेणा-
भिहितः उक्तः तानेव प्रकारानाह नगाद्यालयादेः
स्थल कर्म विधि
नगाद्यालयादेव प्रासादादेः द्वितीयस्तु लिङ्गादेः
स्वायंभुवादेः। तदनु। तृतीयस्तु शिवतनोः शिवमूर्ति-
भेदस्य बेरकादेः प्रतिमादेः बेरमेव बेरकं तत्र त्रिप्रकार-
मध्ये आद्ये आलयादिविषये स्थलभेदाः स्थलकर्मप्रासाद-
प्राकारगोपुरमण्डपपरिवारालयवास्तुजीर्णोद्धारभेदात्
गदिताः उक्ताः द्वितीये लिंगादि जीर्णोद्धारविषये
पिण्डिकामूललिंगस्वायंभुवलिंगबाणलिंगमानुषलिंगचलपीठ-
विषयभेदादष्टसंख्याः ख्याताः पश्चात्तृतीये तु प्रतिमादिविषये।
शिवमतवचनैः शिवागमवचनैः षट्प्रभेदाः बेरार्चाचित्राभास-
शैलकुण्डसिद्धान्तभेदात् एते क्रमेणोच्यन्त इत्यर्थः। तत्र
प्रथमं स्थलकर्म प्रदर्श्यते। "गर्भालयस्य स्थलानि मनसायामल्पा-
भिषेकांकुरगतो जलेषु। पूर्वां विधीनपि गुरुर्देशमावाद्य
प्रथमे स्थलकर्म कुर्यात्॥" गर्भालयस्य गर्भगृहस्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्थलनिम्नतायां स्थलकर्मदार्ढ्यशैथिल्यवशात् स्रवणादिषु
सत्यां छिद्रेषु मूषिकादिकृतरन्ध्रेषु अभिषेकाम्बुगतौ
१० गोमुखद्वारेण निर्गत्य तत्रैवाभिषेकजलस्य गमने च
क्षिते सुधाविहीनत्वे कल्कादिशैथिल्येऽपि सति गुरुराचार्य
महेशं लिङ्गस्थं शिवं कुम्भे आवाह्य स्थलकर्म स्थलदार्ढ्यं
कुर्यात्। तदुक्तं कामिके –

स्थलादौ जलनिःस्रावे जले यः पतितेऽपि वा।
तदग्रे वा निमग्ने तु भूमौ दोषः प्रजायते।
शान्तिहोमं तदा कुर्यात्सलिले पतिते त्र्यहम्।
कुम्भस्थं वाथ देवेशं कृत्वा कुर्यात्स्थलक्रियाम्।
प्रोक्षयेच्छान्तितोयेन स्नानार्थं प्रतिसन्धकम्।
पुण्याहप्रोक्षणोपेतः शिल्पिभिः कारिते स्थले।
ततः संप्रोक्षणं कुर्यात् स्थलकर्मावसानके॥ इति।

तथा सुप्रभेदे –

धर्मगेहस्थले निम्ने कल्कार्यैर्दृढं पुनः।
तदन्ते वास्तुहोमञ्च पुण्याहं तत्र वाचयेदिति॥

कारणे – सुधाकर्मविहीने च स्थलकर्मविहीनके।
प्रवर्तते महामारी पुनस्स्थानमाचरेत्।
पुण्याहं वाचयेद्देवं गन्धैर्वाभिषेचयेत्। इति॥

कामिके तु विशेषः कश्चित्प्रतिपादितः। यथा।

स्थलकर्माणि विश्लिष्टे सुधाकर्मविहीनके।
क्षणमात्रेण निर्लिप्ते कर्मण्यत्र न पूजनम्।
होमाद्यमपि नेष्टं स्यात्कर्तृलिङ्गं समर्चयेत्।
गन्धाद्यैरुपचारैश्च शान्तिहोमं तु वानयेत्।
मूर्तिहोमं दिशाहोमं तत्कर्मगुरुलाघवात्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पीठस्यलोपे क्लिष्टाप्येत स्नपनं देवपीठयोः।
तयोरभ्यन्तरस्यापि दार्ढ्यशैथिल्यकारणात्।
शुद्धिं वस्त्रादिना कृत्वा यथा निर्माल्यशोधनम्।
अस्त्राम्भवस्त्रक्षणं तत्र स्नापनार्थं द्विजोत्तमाः।
बहुधैवलिकं स्नानमंगं चेत स्नपनं महत्।
बहुधैवलिकं बहुदिवस संबन्धि।
महाहविस्तदा प्रोक्तं राज्ञाराष्ट्रस्य शान्तये।
ग्रामस्थानां जनानाञ्च तथा तद्राष्ट्रवासिनाम्।
कर्तुः कारयितुश्चापि देशिकस्य विशेषत इति॥
पद्मसंहिते विश्वेश्वराय नमः। अथ प्रासादजीर्णोद्धारः प्रदर्श्यते।
प्रासादः खलु नागरादिभिदाया त्रेधा। द्विधा स्यात्पुनः
स्फोटादौ सति शिवशोन च फलं स्यात्तस्य वैकांगतः।
वैकल्ये सति तत्तदंगमखिलं तद्रूपतल्लिङ्गयेत्
सर्वांगं यदि तत्तमैस्तदधिकैर्वा कल्पयेत्तथा॥
प्रासादो हर्म्यं विमानमिति पर्यायः स तु नागरादिभिदाया
नागरवेसरद्राविडादिभेदेन सात्विकराजसतामसभेदेन च
त्रेधा भवति। तदुक्तं सुप्रभेदे-
वेसरद्राविडश्चैव नागरश्च त्रिधा भवेत्।
कण्ठादारभ्य वृत्तं यत्तद्वेसरमिति स्मृतम्।
कण्ठादारभ्य चाष्टाश्रं विमानं द्राविडाख्यकम्।
10a सर्वं वै चतुरश्रं यत्प्रासादं नागराभिदम्॥
कारणे विशेष उक्तः।
भौमादि स्तूपि पर्यन्तं चतुराश्रं नागरं भवेत्।
वेद्याः प्रभृति चाष्टाश्रं द्राविडं चेति कीर्तितम्।
(ग्री)
कण्ठात्प्रभृति वृत्तं वेसरं परिकीर्तितमिति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

योगजे – सात्त्विकं नागरं प्रोक्तं राजसं द्राविडं भवेत्।
तामसं वेसरं प्रोक्तस्त्रीपुंनपुंसकं तथा।
नागरं पुंविमानन्तु द्राविडं स्त्रीविमानकम्।
नपुंसकं वेसरं स्यादित्येवं प्रासाद उच्यते इति॥
शिल्पे। पादबन्धं स्थितं प्रोक्तमुपानं बन्धमानकम्।
पद्मबन्धन्तु शयनं ज्ञेयं तत्रापि भेदतः।
ब्राह्मणक्षत्रियौ वैश्यशूद्राणां जातिप्रासादा उच्यन्ते।
नागरं द्विजमित्युक्तं द्राविडं क्षत्रियं तथा।
वेसरं वैश्यशूद्राख्यं जातिभेद इति स्मृतः।
नागरे द्राविडाख्ये च वेसरे त्वधिदेवताः।
ईशः पितामहश्चैव विष्णुस्त्वधिदेवता इति।
एवं त्रिविधोऽपि प्रासादः पुनः द्विविधः। लिंगवशात्प्रासादः
प्रासादवशाल्लिंगञ्चेति। तदुक्तं योगजे।
द्विधा प्रासाद इत्युक्तो लिंगमानवशात्तथा।
प्रासादमानतो लिंगं यथा योग्यं प्रकल्पयेदिति॥
कामिके – स्वायंभुवं बाणलिंगं दैविकं चार्षकं तथा।
सिद्धविद्याधरैश्चापि स्थापितं यन्महात्मभिः।
तेषां लिंगवशाद्विद्वान् प्रासादं परिकल्पयेदिति॥
10b मानुषलिंगविषये पूर्वप्रासादो न विज्ञातश्चेल्लिंगवशात्
प्रासादः कल्पनीयः। तथा कामिके –
अथ पौरुषलिंगस्य . . . द्विविधिरुच्यते,
पूर्वस्मिन् स्थापिते लिंगे न ज्ञाते पूर्वमन्तरे।
लिंगमानवशेनात्र प्रासादं परिकल्पयेदिति।
लिंगमानमपि पूजांशवशेनैव ज्ञातं नान्यथा। तदुक्तं अजितमते
काश्यपे – इष्टभागादधस्तात्तु मूललिंगं न शोभते।

Center for Shaiva Studies, Pondicherry Collection

मोहादज्ञानतो वापि मूलं खात्वा निरीक्षते ।
कर्तुश्च ग्रामवासीनां राज्ञः स्यां नाशहेतुवत् ।
तस्मान्मूलं न वीक्षेत दृश्यभागवशात्पुनः ।
आर्षकं पौरुषं वापि पूर्वमेव प्रतिष्ठितम् ।
पश्चात्प्रासादकरणं लिंगमानेन कारयेदिति ।

इत्येतद्द्विविधं कार्यम् । गर्भिम्ब प्रासादलक्षणं स्फुटमुक्तं तत्रावधार्यताम् । तत्र प्रासादस्य स्फोटनादौ आदि-शब्देन पतनाग्निदाहादौ दिग्वशेन प्राच्यादिदिग्वशेन दिग्भेदेन फलं स्यात् तदुक्तम् कामिके --:

प्रासादः स्फुटितः पूर्वे यदि राज्ञो भयं भवेत् ।
आग्नेय्यामग्निदाहः स्याद्दक्षिणे कलहो भवेत् ।
नैरृत्यां धननाशस्स्यात् वारुण्यां भृत्यनाशनम्,
वायव्यां मित्रनाशस्स्यात् उत्तरे वस्त्रनाशनम् ।
ईशान्यं मूकवाग्राजा क्रमेणैवं फलं भवेदिति ।

तस्य प्रासादस्य एकांगतः स्थूपिनालाशालकपोत-कूटपञ्जरादिमध्ये एकावयववैकल्ये सति भेद-पतनादिना हीनां सत्यां तदंगं पतितादिकं तद्द्रव्यतः दारुविह ~~कालो~~ शैलष्टि लोहादिमध्ये यद्द्रव्येण पूर्वं कृतं तद्द्रव्येण साधयेत् । कारयेत् । अन्यद्रव्येण करणं दोषत्वोक्तत्वात्तदुक्तम् । कारणे --:

स्थूपिनालो च शाला च कपोतः कूटपञ्जरे ।
एतेष्वेकं यदा हीनं कुर्यात्तद्वत्तदा पुनरिति ॥

सूक्ष्मे --: अलक्षणश्चेद्ग्राम स्या दुर्वर्णश्च शैलकम् ।
एकद्रव्येण निर्माणं धाम्ना स्यात्सुधादिषु ।
तत्रैव जीर्णिते काले तद्द्रव्येणैव कारयेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अन्यद्द्रव्यकृतं चेत्तु राजराष्ट्रं विनश्यति ।
जलसंप्रोक्षणं कृत्वा शास्त्रोक्तेनैव मार्गतः ।
तद्द्रव्येणैव कुर्यात्तत्पूर्वोक्तविधिना सह ।
गौरुवेषु विमानेषु पद्मकांगं विहीनकम् ।
तद्द्रव्येण समं कृत्वा संप्रोक्षणमथाचरेदिति ।

वातुले विशेष उक्तः ।

अधिष्ठानस्य वर्गे तु जीर्णितं संभवेद्यदि ।
उपानादिभूमिपर्यन्तं अंगुलानां तु फलं क्रमात् ।
अन्यूनतां च तेनैव तस्य वर्गो न दोषभाक् ।
तदूर्ध्वे हीने कर्तव्यं पुनस्सन्धानमग्रहि ।
॥८ पादवर्गे त्र्यंगुलस्य जीर्णितं स्फुटितं तु वा ।
तद्वर्गसहितं कुर्यात्तदूर्ध्वं न च कारयेत् ।
प्रस्तरे गलवर्गे च त्र्यंगुले च विहीनके ।
तद्वर्गसहितं कुर्यात्तदूर्ध्वं न च कारयेत् ।
पुनस्सन्धानकं कुर्यात् शिखरे च त्र्यंगुले ।
स्फुटिते खण्डिते भिन्ने दोषयुक्ते न दोषभाक् ।
स्तूपिवर्गस्य चांगुल्ये द्व्यंगुले वा विहीनके ।
दोषहीनमिति प्रोक्तं तदूर्ध्वे सन्धानमाचरेत् ।
हीनाधिक्यं तु वर्गे चेत् राजराष्ट्रं विनश्यति ।
तद्दोषशमनार्थाय स्नपनं शान्तिहोमयुक् ।
स्तूपि प्रधानस्थले च चलिते वक्रहीनके ।
पिपीलिकोटरे चैव पूर्वाग्रे विहीनके ।
राजराष्ट्रे च शोकस्स्यात् सम्यग्युक्त्या तु संभवेत् ।

वातुले विशेष उक्तः ।

अधिष्ठानस्य वर्गे तु जीर्णितं सम्भवेद्यदि ।
उपानादिभूमिपर्यन्तमंगुलानां फलं क्रमात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अन्यूनता च तेनैव तस्य वर्गो न दोषभाक् ।
तदूर्ध्वहीने कर्तव्यं पुनस्सन्धानमग्राहि ।
पादवर्गे त्र्यंगुलं वा जीर्णितं स्फुटितं तु वा ।
तद्वर्गसहितं कुर्यात् तदूर्ध्वं न च कारयेत् ।
प्रस्तरे गलवर्गे च त्र्यंगुलं यदि हीनकं ।
तद्वर्गसहितं कुर्यात् तदूर्ध्वं न च कारयेत् ।
पुनस्सन्धानकं कुर्यात् शिखिरे चोत्र्यंगुलं ।
स्फुटिते खण्डिते भिन्ने दोषयुक्तेन दोषभाक् ।
12a स्तूपिकायाश्च यांगुलये त्र्यंगुले वा विहीनके ।
दोषहीनमिति प्रोक्तमूर्ध्वे सन्धानमाचरेत् ।
हीनाधिक्ये तु वर्गे चेद्राजा राष्ट्रं विनश्यति ।
तद्दोषशमनार्थाय स्नपनं शान्तिहोममुक्तं ।
स्तूपी प्रधानकलशे च चारिते वक्रहीनके ।
पिपीलिकोटरे चैव पूर्वावति विहीनके ।
राज्ञो राष्ट्रे च शोकस्स्यात् सम्प्रयुक्त्वा तु संभवेत् ।
नवमन्यं परिग्राह्यं लक्षणोक्तक्रमेण तु ।
पद्मकर्णिका कण्ठे तु जालिका चक्रकुण्डलम् ।
क्रमात् तद्वर्गसहितं तद्द्रव्येण समाचरेत् ।
संप्रोक्षणं ततः कुर्यात् शान्तिहोमेन शाम्यति ।
षड्वर्गे स्फुटिते भिन्ने नाशिते चैव हीनके ।
तद्ग्रामवासिनां क्षिप्रं रोगशोकभयावहम् ।
पुनस्सन्धानकं कृत्वा स्नपनं शान्तिहोमकम् ,
शिखराकृतिं च नाशिका भूषणादिकम् ।
कालदण्डस्य विच्छेदः पुरातनमथापि वा ।
ग्रामस्तुत्वा यदा कृत्वा धामान्यत्वान्यदा भवेत् ,
पुनस्सन्धानकं कृत्वा शान्तिहोमाभिषेचनम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कण्ठे चाङ्गुलहीने च पादपीठविहीनके।
पुष्पेन वज्रविच्छेदे शालाबोधिकमूलिके।
कण्ठे च वाजिने हीने स्वल्पनाशं न संशयः॥
पुनस्सन्धानकं कृत्वा शान्तिहोमं तु कारयेत्।
तृतीयं मूर्तिशिखरे जीर्णोद्धारं क्रमात्कुरु।
12b दिङ्मूर्तिशिखरे देवजीर्णोद्धारक्रमान्नयेत्। इति।
विमानाद्यंगवैकल्येपि क्वचित्क्वचित् क्षन्तव्यं
प्रतिपादितं तद्यथा कामिके -:
सर्वलक्षणसंयुक्तमल्पदोषं यदा भवेत्।
प्रासादस्य तु विस्तारे स्तमात्रं न दुष्यते।
उत्सेधे रविभागान्तं क्षन्तव्यं चांगुलाधिकम्।
द्विमात्रं तु स्थले प्रोक्तं स्तम्भाद्यंगेषु मात्रकम्।
ग्रामखेटपुराणान्तु दण्डान्तपरिकीर्तितम्।
सारे च हस्तमानान्तु क्षन्तव्यमिति कीर्तितम्।
तदूर्ध्वं नेष्टमेव स्यात् महानासं त्र्यंगुलम्।
इच्छाधिकन कर्तव्यं शिखरे तु दशांगुलम्।
पञ्चाननेष्टं प्रकर्तव्यं कण्ठे तु त्र्यंगुलं भवेत्।
अत ऊर्ध्वं न कर्तव्यं वाजिमाल द्व्यंगुलम्।
शाक्तिध्वजमितं प्रोक्तं गवमैवं च संग्रहे।
हेमादि प्रस्तरान्तश्च सप्तांगुलसमावधि।
सर्वं गृहीत्वा कर्तव्यं ऊर्ध्वं न्यास्यं प्रयत्नतः।
अन्येषामपि सर्वेषां जीर्णोद्धारं समाचरेदिति।
एवमेकांगवैकल्ये षट्प्रकारमुक्त्वा सर्वांग-
वैकल्ये सति तत्समैः पूर्वप्रासादद्रव्यसमैः। तदधिकैर्वा
द्रव्यैस्तथा। पूर्वप्रकारेणैव सङ्कल्पयेत्। तदुक्तं सूक्ष्मतन्त्रे -:
सर्वांगानां क्षयं दृष्ट्वा प्रासादस्य विशेषतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तद्द्रव्येणैव तत्कुर्यात्पूर्वोक्तविधिना सह ।
परद्रव्येण कर्तव्यं यथा वित्तानुसारतः ॥
13a सलक्षणस्य धाम्नस्तु परद्रव्येण तत्क्रिया ।
तस्मात्सर्वप्रयत्नेन हीनञ्चैव न कारयेदिति ।
कारणे :- प्रतिमायां विमानस्य पूर्वस्य धारणं विना ।
स्थूप्याद्यालयोद्देशे कान्तं तु ज्ञात्वा त्यक्त्वाद्यशोभकम् ।
आद्येष्टिकां क्षिपेत् प्राग्वत् गर्भन्यास समन्वितम् ।
यावन्मन्दिरपर्यन्तं तावत्कृत्वा सलक्षणम् ।
यद्द्रव्येण कृतं हर्म्यं यत्प्रमाणं समाकृति ।
तद्द्रव्येण पुनः कृत्वा तत्प्रमाणेन बुद्धिमान् ।
सर्वावयवसंपूर्णं यथाशोभं यथा बलम् ।
सर्वेष्टिका शिलाद्यैव जीर्णप्रासादकेऽपि च ।
कर्मयोग्यस्तु संग्राह्य शेषाणां परिवर्जयेत् ।
हीनमानो ध्रुवे धाम्नि शास्त्रोक्तं नाधिकं नयेत् ।
तस्माद्धीनं न कर्तव्यं यत्कृष्टं शुभदं स्मृतमिति ।
तथा वैखानसे पूर्वेणोत्कृष्टकं कुर्या तस्योत्कृष्टमाचरेत् ।
अपकृष्टः कुर्वं पूर्वं पश्चादुत्कृष्टमाचरेत् ।
कामिके :- नागरे नागरं कुर्याद्वेसरे वेसरं मतम् ।
द्राविडे द्राविडं कुर्याद्विराटादौ यथेऽपि वेति ।
अंशुमते :- वेसरे वेसरं कुर्याद्द्राविडं द्राविडं मतम् ।
शान्तिकादिषु यत्कार्यं तदेवं तु पुनः पुनः ।
विपरीतमनर्थाय भवत्यत्र न संशयः ।
यानं यानं विमानं तु तथा भवनमिष्यत इति ।
महाविश्वकर्मीये
मानोन्मानादि संयुक्तं विमानं मण्टपादिकम् ।
13b तन्मानादधिकं हीनं न कुर्यात्सर्वदोषकृत् ।
मूलहर्म्यं शिलामिश्रन्तत्पूर्वं मण्टपादिकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिलाभिरिष्टकाभिर्वा मूलं चेदिष्टकामयम् ।
मण्डपादीनि सर्वाणि न कुर्यादुपलैर्वर्तैः ।
शानाद्धामोदकतो वापि कुर्याद्यदि शिवालयम् ।
सर्वदोषप्रदं नित्यं तस्मात्परिहरेत्सुधीः ।

अंशुमति । विमानं जीर्णितं चैव उपकार्यञ्च निर्मितम् ।
पुराणानि विमानानि न्यूनाधिक्यं सहारयेत् ।
पूर्वमानेन कर्तव्यं अन्यमानेन कारयेत् ।
यजमानेच्छया कुर्यात्कला वेशां च कारयेत् ।

महाउररान्तरे :-
वार्क्षं धामेष्टकं कुर्याद्दैष्टकं चोपलं हरेत् ।
हीनद्रव्यमोत्तम द्रव्यैः कुर्यात्तत्तन्मयं सुधीरिति ।

कामिके :- कृते युगे नागरं स्यात्त्रेतायां द्राविडं तथा ।
द्वापरे वेसरं कार्यं सार्वदेश्यं कलौ युगे ।
वाराटं चैव कालिंगं सद्वयापि च सम्मतम् ।
तत्रैव तत्प्रकारेण
तस्मात्कृते योगिभिः कार्यं सार्वदेशिक संज्ञकम् ।
तत्र संकरदोषोऽपि वा मन्त्रालंकारजोऽपि वा ।
आचार्यसंकरो वापि देव संकर एव च ।
कालसंकरदोषश्च कुलसंकर एव च ।
अन्योऽपि संकरो वापि युतो जाते विशिष्यते । इति ।

अत्रैवं प्रासादजीर्णोद्धारे शिल्पिकृत्यमुक्त्वा आचार्यकृत्यमाह :-
आचार्य शिवधाम्नि जीर्णपतिते लिंगादि बालाभिधं
कृत्वा धाम च मूलशक्तिमपि चान्यालये मूलं तथा ।
कृत्वा पञ्चरमध्यगं प्रतिदिनं संपूजनं शान्तियुक्
149 निष्पन्ने भवने पुनश्च विधिवन्मूलं च शक्तिं न्यसेत् ॥

Center for Shaiva Studies, Pondicherry Collection

आचार्यः कर्षणादिप्रतिष्ठान्तक्रियाकलापनिपुणः
तस्यैवात्मलिंगादित्वात् शिवधाम्नि शिवप्रासादे
जीर्णपतिते जीर्णे वाग्निदग्धाशनिपतनादि महादिना
वा पतिते सति बालाभिधं लिंगं बालालिंगं
बालालयं च कृत्वा । तदुक्तं कामिके :

हर्म्यारम्भे च जीर्णे च भिन्ने तु विकलांगके ।
स्फोटनादिषु दोषेषु बालस्थानं तु कारयेत् ।

वातुले : मन्दिरे चलिते भिन्ने पतिते नाशिते तथा ।
बालहर्म्यं तथा कृत्वा स्थापयेद्विधिपूर्वकम् ।
पूर्ववत्स्नपनं कृत्वा संप्रोक्षणमथाचरेत् ।
लिंगे आधारपाते च ~~स्कन्ध~~ नन्द्यावर्तस्यलोपि वा ।
रुद्रद्वारादिकै चैव चलने सति कुत्रचित् ।
तत्प्राङ्गनाशनं प्रोक्तं नृपतिस्त्वन्यथा भवेत् ।
बालहर्म्यं तथा कृत्वा पुनस्स्थानमाचरेत् ।

सूक्ष्मे : बालस्थानं विना यत्र पुत्रपौत्रविनाशनम् ।
तस्मात्सर्वप्रयत्नेन बालस्थानं विधीयते ।

तत्रैव बालस्थानप्रकरणे ।

विना बालगृहं यत्र कुलक्षयकरं भवेत् ।
तस्मात्सर्वप्रयत्नेन बालगेहं प्रकल्पयेत् ।
उत्तरायण काले तु शुक्लपक्षे शुभे दिने ।
सुमुहूर्ते सुनक्षत्रे देवालय वेशनम् ।
दोषं दृष्ट्वा तथा काले तरुणालय कर्मभम् ।

तत्र सामान्येन कालनियम उक्तः ।

भूमिनिमित्त परीक्षा च शंकुस्थापनमेव च ।
कर्षणं पादविन्यास कालादीनां परीक्षणम् ।
कूर्मेष्टिका शिलान्यासं शूलस्थापनकर्म च ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

14b यागशालादिकुण्डादि देवारम्भादिकर्म च ।
जलं प्रोक्षणादीनि जीर्णोद्धारादिकर्म च ।
देवताविमुतजनानां पवित्रारोहणं तथा ।
देवालयस्य बिम्बानां आवाहनविसर्जनम् ।
एतानि कारयेदन्ते रागौ यानि न कारयेत् ।

इति कारणे ।

अतः बालप्रतिष्ठान्तु प्रवक्ष्यामि विशेषतः ।
द्विधा बालालयं प्रोक्तं प्रथमञ्च द्वितीयकम् ।
ग्रामे वा नगरे वापि पट्टणे राजधानिके ।
एतेष्वन्येषु देशेषु कुलस्थानेषु सर्वशः ।
वास्तुनिर्देशनान्ते च कल्पितं प्रथमं भवेत् ।

सूक्ष्मभेदे अंशुमति च । आद्यं बालगृहं कल्प्य कुलगेहं ततः परम् ।
(ग्रामे वा नगरे वापि पट्टणे राजधानिके ।)
कुललिङ्गप्रतिष्ठा वा यथा बालगृहं त्यजेत् ।

पुनः प्रासादकरणे । छिन्ने भिन्ने विकृते । विशीर्णे च
तथा पीठे लिङ्गे च प्रतिमादिके
यत्कृतं तद्द्वितीयाख्यं तरुणालयमुत्तमम् ।

कारणे - मालपक्षादिकान्युक्त्वा प्रोक्षणीयमित्युक्तं तद्यथा
मालपक्षार्धवारादि न्यस्य बालगृहस्य तु ।
लिङ्गस्थापनकर्मोक्तमार्गेण समाचरेत् ।
तेषु काष्ठे द्विशोक्ते प्रोष्ठा वै चरराशयः ।
मध्यमाश्चोभयन्येषां अधमा स्थिरराशयः ।
द्वितीयारम्यं प्रकर्तव्यं मालपक्षादिभिर्विना ।

बालालिङ्गचललिङ्गलक्षणम् । यथा -
लोहजं शैलजं लिङ्गं दारुजं मृण्मयं तु वा ।
कारयेत्तु विशेषेण लक्षणोक्तेन देशिकः ।
15a शैलजं क्षीरजं वापि बालालिङ्गं प्रकल्पयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बालालयं तथा लिंगमेव संकल्प्य दैशिकः।
कामिके - लिंगमानवशेनापि पीठन्तु परिकल्पयेत्।
लोहजं शैलजं बाललिंगमेव प्रकल्पयेत्।
क्षीरवृक्षापलाशैर्वा वटोदुम्बरपिप्पलैः।
मधूकपनसैः वृक्षैः सालचन्दनसारादिभिः।
सरलाम्रकवृक्षाभ्यां लिंगबेरं समाचरेत्।
सुप्रभेदे - शमीबिल्वमधूकैश्च अश्वत्थोदुम्बरैस्तथा।
बाललिंगं प्रकर्तव्यं मृण्मयं चेत् सुपक्वकम्।
स्वयं वा कारयेत् पीठमथवा चेष्टकामयमिति। आगम॥
बाललिंगस्य मानभेदोऽपि वीरतन्त्रे प्रतिपादितः यथा
द्वारमानेन वा कुर्यात् गर्भमानमथापि वा।
लिंगमानेन वा कुर्यात्तालमानेन वा पुनः।
प्रतिमामानं वा कुर्यात् वृक्षभागद्वयं तु वा।
तालमानं प्रवक्ष्यामि चतुस्तालं तु चोत्तमम्।
त्रितालं मध्यमं प्रोक्तं द्वितालं कन्यसं भवेत्।
एवमेव प्रकारेण बाललिंगन्तु कारयेत्।
शैलजं दारुजं वापि बाललिंगं करोति हि।
दशाश्चं नवधा भक्तं तस्यैकं प्रतिमार्चनम्।
लिंगसूत्रेण कर्तव्यं नालं चैव न कारयेदिति।
तल्लक्षणं सुप्रभेदे -
पूजाभागसमायामं त्रिपादं वार्धमेव वा।
अध्यामलक्षणान्नाहं लक्षणोद्धारणं विना।
ततो विष्णुविरिञ्चांशौ तद्विशेषो मूर्तिलिंगवत्।
बालगेहान्तरे पीठं बाललिंगसमान्वितम्।
उच्छ्रायसमविस्तारं श्वावटं द्विसूत्रणालकम्।
लिंगायामं त्रिधा कृत्वा भागं पीठे निवेशयेत्।
वृत्तं वा चतुरश्रं वा षोडशांशमथापि वा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्नानपीठं न कर्तव्यं पादशैलादिकानि च ।
प्रतिलिंगं च कर्तव्यं सूत्रस्यैव तथा भवेत् ।
विकारांगुलमायामं तस्मान्नालमुच्यते ।
अंगुल्यांगुलवृद्ध्या तु सन्ध्यालिंगानि कारयेत् ।
लिंगोदयं तु नवांशस्यात्तत्समं वृत्तमिहोच्यते ।
शिरसो वृत्तनं कुर्याच्छत्रकारविशेषतः ।
चतुरश्रमथाश्रं वृत्तं वा त्रिधा पीठाकृतिर्मता ।
लिंगानां वास्तु विस्तारं उत्सेधं स्यात्तदर्धकम् ।
इष्टिकाभिस्सुधकाभिः पीठं कुर्यात्तु तद्बुधः ।
स्नानपीठं प्रकर्तव्यं पीठशैलादिकर्म च ।
बहुलिंगविना कुर्यादेवं स्यात्प्रथमस्य तु ।
रुद्रभागसमायामा नालं तेनैव कल्पयेत् ।
तन्नालं पीठविस्तारं तस्यार्धार्धपिण्डिकाश्रयम् ।
शेषं पूर्ववत् प्रोक्तं द्वितीयस्यैव मायरादिति ।
बालालयस्य लक्षणं यथा कामिके
१६a
मूलस्थानस्य चैशान्यामुत्तरे पूर्वयाम्ययोः ।
आग्नेय्यामिष्टदेशे वा कुर्याद्बालगृहं गुरुः इति ।
कारणे- मूलस्थानाग्रके कुर्यादीशानो वा सौम्यके ।
प्राकारे तु द्वितीये वा तृतीये वा चतुर्थके ।
पञ्चमे वा कर्तव्यं बालस्थानं क्रमेण तु ।
त्रिहस्तादि समारभ्य द्वादशांगुलवर्धनात् ।
सार्धसप्तकरान्तन्तु बालालयमिति स्मृतम् ।
तदेवैकन्तु समारभ्य कारयेत्तरुणालयम् ।
वीरतन्त्रे- कुण्डं वा मण्टपं वापि प्रासादं वापि कारयेत् ।
एकं त्रिपादमर्धं वा कुटमण्टपमुच्यते ।
बालस्थानस्य चाग्रे तु प्रपां कृत्वा तु पूर्ववदिति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अजिते :- श्रुतवेदान्तस्तत्तु ज्येष्ठमध्यकनीयसः।
निवृत्तं कल्पयेद्द्रव्यं शैलं पक्वेष्टकामयम् ।
आमेष्टकामयं वापि मुखमण्डपसंयुतम् ।
कर्णिकांशैर्युगांशैस्तु गर्भं तस्य प्रकल्पयेत् ।
तत्र द्वारे तु भागे च व्योमांशान्योन्यसूकरम् ।
मध्यरद्विगुणां भित्तिमुच्छ्रायेण प्रकल्पयेत् ।
तदूर्ध्वे दारुजः कूटं कल्पयेत्कल्पवित्तमः।
लिंगमेवं समापाद्य मूलगर्भप्रमाणतः।
गवाक्षं वा चतुर्भागं प्रोक्तं बालगृहं त्विहेति ।
तत्र बालिलिंगे मूलशान्तिं मूललिंगबाहितशान्तिमात्रा
168 यात्राहोमसंहितं आवश्यकत्वेन अंकुरं च तत्क्रियाप्रकारस्यानेकागम-
वचनैरेव तत्क्रियाकलापः क्रमवद्दृश्यते ॥ अजिते-
बालालयस्य पुरतो दक्षिणोत्तरयोस्तु वा ।
वह्नीशंकरयोर्वापि देशे कुर्यात्तु मण्डपम् ।
सप्तपञ्चत्रिभिर्वापि ज्येष्ठं मध्यकनीयसाम् ।
तन्मध्ये वेदिकां कुर्यात् नवभागैकभागतः।
कुण्डानि परितं कुर्यात् पूर्ववन्मन्त्रवित्तमः।
अथवा कल्पयेत्तु प्रागादिषु यथाक्रमम् ।
चतुरश्रं धनुर्वृत्तं पद्मकं चाष्टवृत्तकम् ।
ईशानशक्रयोर्मध्ये प्रधानं वृत्तकुण्डकम् ।
अजिते-: गोमयेनोपलिप्याथ ब्राह्मणान्भोजयेत्सुधीः।
ततो लिंगं समानीय मण्डपस्योत्तरे कृते ।
स्नानमण्डपमध्ये तु वेदिकां तत्र विस्तृते ।
स्नानं वेदान्तु विन्यस्य पञ्चाङ्गं सह ..
पात्रामृत्पञ्चगव्यैस्तु शुद्धिं कृत्वा समाहितः।

Center for Shaiva Studies, Pondicherry Collection

कामिके — मण्डपयोरन्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत् ।
पश्चाच्छिल्पि समुद्वास्य पुण्याहं वाचयेत्ततः ।
जलमध्ये प्रपां कुर्यात् सर्वलक्षणसंयुतम् ।
प्रक्षाल्य पञ्चगव्येन लिंगमन्त्रेण देशिकः ।
शुद्धतोयेन संस्थाप्य गन्धादिभिस्तदार्चयेत् ।
17a वस्त्रयुग्मेन संवेष्ट्य सम्बकूर्चसमान्वितम् ।
जले संशाययेल्लिंगं सयनेन कुशोपरि ।
त्रिरात्रं चैकरात्रं वा वेदयामावसानकम् ।
प्रभूतपञ्चगव्येन स्नपनं वा समाचरेत् ।
परितः कलशानष्टौ लोकपालादिदेवतान् ।
सवस्त्रान्सहिरण्यांश्च कूर्चादीनपि धानकान् ।
वास्तुहोमं ततः कुर्यात् प्रासादे मण्डपेऽपि च ।
पर्यग्निकरणं कृत्वा वास्तु होमस्य वह्निना ।
जलादानीय लिंगन्तु स्नानश्वभ्रोपरि न्यसेत् ।
वस्त्रं विसृज्य लिंगन्तु पूर्ववत् शुद्धिमाचरेत् ।
कौतुकं बन्धयेद्धीमान् हृदयेन तु मन्त्रतः ।
वस्त्रेण वेष्टयेल्लिंगं वामदेवेन देशिकः ।
शालिभिर्वेदिकोर्ध्वे तु चाष्टद्रोणैस्सुनिर्मलैः ।
तण्डुलैश्च तिलैर्दर्भैः पुष्पैश्चापि परिस्तरेत् ।
शयनं कल्पयेन्मध्ये चर्मजाद्यैरनुक्रमात् ।
सर्वतोद्य समायुक्तैः स्तोत्रमंगलवाचकैः ।
सर्वलक्षणसंयुक्तश्चाचार्यः शैव साधकः ।
दिव्यगन्धानुलिप्तांगः पुष्पमाला विभूषितः ।
श्वेतवस्त्रो धृतोष्णीष श्वेतवस्त्रोत्तरीयकः ।
पञ्चांगभूषणोपेत सकलीकृतविग्रहः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ईदृशैर्लक्षणैर्युक्त आचार्यो चोत्तराननः।
शयने शयनं लिङ्गं प्राक्शिरस्कमधोमुखम्।
अभ्यर्च्य हृदयेनैव गन्धाद्यैरुपचारकैरिति।
अजिते :- अधिवासनकाले तु विशेषोयं प्रदृश्यते।
जीर्णलिङ्गान्तिकाग्रेव वा स्थण्डिले चोक्तलक्षणैः।
विन्यसेत्कलशौ मन्त्री शिवशक्तिसुलंगता।
यात्राहोमन्तु तत्रैव कृत्वा तु विधिना ततः।
116 पूजयेदयं विप्रेन्द्र धर्मवृत्तपरायणः।
यात्राहोमं विधिं वक्ष्ये सैकते स्थण्डिले शुभे।
विधिनाग्निं समाधाय समिधाज्य चरून् क्रमात्।
यवसर्षपलाजांश्च चरूणां शतसंख्यया।
प्रत्येकं तु तदर्धं वा तत्तन्मूलाङ्गकैः क्रमात्।
होमयेच्च तदन्ते तु बीजमुख्येन सर्पिषा।
होमयेद्देशिको दीर्घसंख्यायाः पुरोक्तया।
पूर्णसर्वात्मना तत्र जुहुयाद्देशिकोत्तमः।
सुप्रभेदे :-
उत्पाट्य शयनाल्लिङ्गं तरुणालयमध्यमे।
संस्थाप्य लिङ्गं सुश्लिष्टं पीठत्यागमध्यमे।
स्थापयेद्देशिको धीमान् शिवमन्त्रमुदीरयन्।
बन्धयित्वा निबन्धेन हृदयं मन्त्रमुच्चरन्।
अजिते :- बालस्थाने स्थिते लिङ्गे देवमावाह्य मन्त्रवित्।
तद्विधानं श्री कामिके :-
कलशे होमकं तत्र पूर्ववत्स्थण्डिले कृते।
कुम्भान् संस्थाप्य पूर्वोक्तविधिना देशिकोत्तमः।
बाललिङ्गन्तु सम्पूज्य नैवेद्यं हविषा सह।
प्रणम्य देवदेवेशं कर्ता कर्मा विचक्षणः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शकवत्सरमारभ्य यावत्तथा द्वादशाब्दकम् ।
तदनन्तरं न विकृत्य पुनस्तत्स्थापयाम्यहम् ।
इति विज्ञाप्य तत्कर्ता देशिकेन सहैव तु ।
लिङ्गादेवं समादाय कुम्भमध्ये न्यसेद्गुरुः ।
पीठादेवीं समादाय वर्धन्यां मध्यमे न्यसेत् ।
सूक्ष्मभेदे - विज्ञाप्य देवदेवेशं क्षणं कालं विचक्षणः ।
शकाब्दा द्वादशाब्दान्तं बालस्थाने स्थितो भव ।
एतयोरब्दयोर्मध्ये कुर्यान्मूलप्रवेशनम् ।
विज्ञापयेद्द्वितीये तु आद्ये विज्ञापनं विना ।
तथा वातुले -
प्रार्थयेत्तु नमस्कृत्य त्रिपक्षे वा त्रिमासके ।
18a अब्दे तृतीये कर्तव्यं इति विज्ञाप्य सन्निधौ ।
सूक्ष्मभेदे - कुम्भस्थाद्देवदेवेशं तत्र मूलेन विन्यसेत् ।
शिवाङ्गानि न्यसेत्पश्चात् पिण्डिकायां मनोन्मनीम् ।
अष्टविद्येश्वरांस्तत्र पीठे पूर्वादितो न्यसेत् ।
विद्येशोमाशिवांश्चैवं तु कुम्भेऽस्त्रगामिपचयादिति ।
एतच्चात्र संक्रामणरूपं न तु निरालम्बं वा एतेषां स्वरूपमात्मार्थपूजापद्धतौ विस्तरेण प्रदर्शितम् । तत्रावधार्यताम् ॥ कामिके -

तदग्रे स्थण्डिलं कृत्वा प्राग्वदन्याङ्कुरं नयेत् ।
समिदाज्यचरून्लाजैश्च तिलैरष्टोत्तरं शतम् ।
मूलेन होमयेद्विद्वानङ्गानाञ्च दशांशतः ।
होमयुक्तदूर्वाभिर्मृत्युञ्जयमन्त्रमुच्चरन् ।
सहस्रं वा तदर्धं वा शतमष्टोत्तरं तु वा ।
एवं हुत्वा तदन्ते तु क्षणहोमं समाचरेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वालरैस्तूर्यघूर्वैश्च नक्षत्रैस्तुरगादिभिः।
मेषादिमानकैश्चैव तिथिभिः प्रथमादिभिः।
जुहुयादेकवाहुत्या प्रतिवत्सरमाचरेत्।
गद्याद्यध्ययनं कुर्यात् संस्कृतो वेदपारगः।
तत्र मन्त्रा गद्याद्यास्तु जप्तव्या मुक्तिहेतवः।
181. सद्योजातस्तु ऋग्वेदो वामदेवो यजुस्स्मृतः।
अघोरस्सामवेदस्तु अथर्वं पुरुषस्स्मृतः।
अष्टोत्तरसहस्रं वा तदर्धं वा तदर्धकम्।
अष्टोत्तरशतं वापि जपेद्वृद्धिकविद्ध्ये।
मूर्तिपानामलाभे तु देशिकस्सर्वमाचरेत्।

अजिते –:

पञ्चहोमविधानं तु पुरुषं पूर्वकुण्डके।
दक्षिणे बहुरूपन्तु पश्चिमे सद्यमन्त्रतकम्।
उत्तरे वामदेवाख्यो मीशाने तु प्रधानकम्।

नवहोमवृक्षाः सुप्रभेदे –:

खादिरं वटबिल्वौ च प्लक्षाश्वत्थ उदुम्बराः।
शमी वैकङ्कतं चैव समित्पूर्वादितः क्रमात्।
पलाशं तु प्रधानं स्यात् शतमष्टोत्तरं भवेत्।
मूलमन्त्रेण होतव्यं पालाशैर्देशिकोत्तमः।
मूलादृशान्तवोन्यंपा दिक्षुक्रमान्निर्पयेत्।
विदिक्षु हृदयाद्यैस्तु मूलार्धं वा समन्तु वा।
पूर्णाहुतिं ततः कुर्याद्धौषडन्तेन मूलतः।
आत्मतत्वादिकं न्यस्य मूर्तिं मूर्तीश्वरानपि।
सर्वलिङ्गे तु विन्यस्य वन्हावाहूय होमयेत्।
पूर्णाहुतिं ततो दद्या नयेद्रात्रिं च मङ्गलैः।
अपरे दिवसे धीमान् सुस्नातो मूर्तिपैस्सह।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सकलीकृत देहस्तु द्वारद्वारादि विन्यसेत् ।
12a दैवं सम्पूज्य पुष्पाद्यैः कुण्डमग्रेण संयजेत् ।
संस्कृत्य स्रुक्स्रुवाज्यानि प्रणवादीन्परितो यजेत् ।
पूर्णाहुतिं ततः कृत्वा मन्त्रानावाह्य तर्पयेत् ।
प्रायश्चित्तादिमन्त्रांस्तु होममेव समाचरेत् ।
अघोरेण शतं हुत्वा सर्वाघैर्दुरितक्षये ।
पूर्णाहुतिं ततः कुर्याद्देशिको मूर्तिपैस्सह ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
अधमं शतनिष्कं स्यात् । द्विगुणं मध्यमं भवेत् ।
त्रिगुणं शोत्तमं प्रोक्तं अधमं त्रिः प्रकल्पयेत् ।
द्विगुणं मध्यमं कल्प्यं त्रिगुणं चोत्तमं भवेत् ।
दशभागैकभागन्तु मूर्तिधारकदक्षिणा ।
तदर्धं मन्त्रजपता वैदिकानां तु तत्समम् ।
दैवज्ञे तत्समं प्रोक्तं द्विगुणं स्यात्तु होमिनः ।
आचार्यस्य चतुर्थांशं शिल्पिने दक्षिणा मता ।
अजिते: अर्चनोक्तं समभ्यर्च्य प्रभूत हविषं ददेत् ।
नित्योत्सवादिकं सर्वं बालस्थाने समाचरेत् ।
उत्सवन्तु यथा शक्त्या । द्वितीये तरुणालये ॥ इति ।
लिंगन्तु बालमिदमित्यत्र आदिशब्देनास्मन्तं उक्तदशविध-
बालालिंगान्यप्युच्यन्ते ॥ तद्यथा ॥
प्रायश्चित्तार्थकं यत्र स्थापयेत् बालालिंगकम् ।
12b द्वितीयमिति ज्ञेयं तत् — वेदविदां विदुः ।
खड्गे कूर्चे च बिम्बे वा दर्पणप्रतिबिम्बके ।
कुंभे च स्थण्डिले चैव मण्डले पादुके यथा ।
पटे वा भित्तिचित्रे वा बालबिम्बार्चकं यजेत् ।
मण्डले स्थण्डिले चैव कूर्चे चैव विशेषतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तद्बिम्बस्यार्चनं कुर्यात् आदौ सप्तदिवसावधि । ?
मण्डलार्चनमार्गेण कारयेद्देशिकोत्तमः ।
शेषाण्यन्यानि बिम्बानि मासावुक्तविधिं यजेत् ।
ऽत्रैवां नदीप्रभवादिवशेन विषयभेदो द्रष्टव्यः ।
तथा कामिके :-

स्वयम्भूतलिङ्गे च दैविके चार्षकेऽपि च ।
गणपे लोहजे चैव नदी प्रस्रवणादिषु ।
ऽलमादिषु लिङ्गेषु नैव कार्यघटास्थितिः । इति ।

स्वयंभूलिङ्गस्य बालालिङ्गं निषेधः । कुत्रचिदागमे प्रतिमादिवत् तत्कर्तव्यमिति कुत्रचिदुक्तं तत्र जीर्णालयविषये ज्ञातव्यांश्च निषेध इति मन्तव्यः तथा वीरतन्त्रे :-

स्वयम्भूतलिङ्गस्य स्थापितस्य महर्षिभिः ।
दैवैर्वा स्थापितस्यापि बालालिङ्गं तु कारयेत् ।
जीर्णलिङ्गे तु कर्तव्यमन्यथा तु न कारयेत् ॥

कामिके :-

मानुषाणां तु लिङ्गानां अत्र कार्या घटस्थितिम् ।
सप्ताहान्तंश्च पक्षान्तं मासान्तं चेद्घटस्थितिः ।
मासादूर्ध्वं न कर्तव्यं कुम्भे संस्थापनं विदुः ।
कलशस्थापनस्योक्तमार्गेणैव समाचरेत् ।
20 तदूर्ध्वं कुम्भसंस्थं चेद्देवेशस्सर्वदोषकृत् ।
स्वयं-भ्वादि-विषये तस्मात्सर्वप्रयत्नेन मासान्ते वाऽपूर्वके ।
संस्थाप्य बालालिङ्गाद्यं तन्महद्वे विन्यसेन्मनुम् ।

कामिके :-

पञ्चाहस्योत्तमं प्रोक्तं सप्ताहो मध्यमं भवेत् ।
मासं कन्यसमित्युक्तं वज्रस्थलस्य तु बुद्धिमान् ।
नित्यं नवजलं योज्य पूजयेत्पूर्ववत्क्रमात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सन्निवेश्याथ देवेशं सायुधं च सवाहनम् ।
आवृतीशान् परिवारान् तथा तत्रैव योजयेत् ।
विमानस्थां ततो देवां स्तथा तत्रैव योजयेदिति ।
अत्रैव विशेष उक्तः ।
एकभाले तु कुंभे स्यात् विमाने स्वर्ण एव च ।
बाणभाले दर्पणे प्रोक्तं वस्त्रे पटचित्रके ।
द्विवर्षे भित्तिचित्रे स्यादावाहनमिहोच्यते ।
कामिके --
बालादि द्वादशाब्दान्तं तदन्तरदिनेष्वपि ।
तस्मादादाय देवेशं मूललिंगे नियोजयेदिति ।
सोमस्कन्दादिबिम्बेषु त्र्यंशकाद्वर्षमुच्यते ।
अनन्तरं मूललिंगे कृत्यमाह मूलं तत इति ।
ततोनन्तरं मूललिंगं पञ्जरमध्यगं वा कृतपंजरान्तरं
कृत्वा प्रतिदिनं शान्तियुक् शान्तिहोमसहितं
संपूजयेत् । तथा कारणे --
206 बाललिंगं ततः कुर्यात् स्थापयेत्तरुणालये ।
मूललिंगं विशेषेण पञ्जरेण तु योजयेत् ।
तत्र पूजा प्रकर्तव्या प्रोक्षणान्तं विशेषतः ।
नित्यादीनि विशेषान्तं तल्लिंगे तु सुयोजयेत् ।
प्रत्यहं चार्चनं कार्यं शान्तिहोमसमन्वितम् ।
यावन्न वृत्तान्तं प्रासादाद्यं यथाविधि ।
तावत्पूजादिकं सर्वं कारयेत्तरुणालये इति ।
एतत्पञ्जरमध्यस्थ करणमावर्तनावर्तन पुनरावर्तनान्त-
रीत्यात्मक चतुर्विध संप्रोक्षणमध्ये पुनरावर्तनान्तरितयोः
कार्यं तथा चोक्तमंशुमति --
संप्रोक्षणविधिं वक्ष्ये श्रूयतां रविसत्तम ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आवर्तं प्रथमं प्रोक्तमनावर्तन्तु तत्परम् ।
कारणे :- प्रासादे पतिते भिन्ने लिंगे च चलिते तथा ।
मूलालयात्समादाय स्थाप्य बालगृहे ततः ।
तस्मान्मूलप्रवेशं यत् पुनरावर्तकं मतम् ।
पुनरावर्तकं त्वेवं द्विविधं चेति कीर्तितम् ।
क्षुण्णे क्षुण्णे तु संप्रोक्ष्य जीर्णे कालान्तरे गते ।
प्रासादे पतिते भिन्ने लिंगे चलनसंयुते ।
स्थानशक्तिं समादाय बालबिंबे तु योजयेत् ।
प्रासादं पूर्ववत्कृत्वा संप्रोक्षणमथाचरेत् ।
अविशालं विशालार्थं बालोत्कृष्टार्थकं च यत् ।
मूलालयात्समादाय बालबिम्बे तु योजयेत् ।
पञ्जरं लिंगमित्याहुः शिवं चैव ततुकीरवत् ।
तद्वच्छक्तिं सदा मध्ये तत्कालबिंबे सुयोजयेत् ।
तल्लिंगं तच्छिवं चैव भवबीजं यथावत् ।
लिंगपञ्जरमेवं च योजये दारुपंजरे ।
21.^ तस्मात्त्वाकीर्तं चैव शुकपञ्जरमानतः ।
चित्राभासं शुभं योज्य द्वितीये तु विशालके ।
अंशुमत्याम् :-
प्रत्यंगोपांगहीने च वैरचित्रादिहीनके ।
स्थलकर्मविहीने च पाण्डिकावेलविहीनके ।
भूषणायुधहीने च प्रोक्षणञ्चान्तरालकमिति ।
अथ भवने । गर्भगृहे । निष्पादने शिल्पकृत्याचार्य-
कृत्याभ्यां समाप्ते सति आशिल्पकृत्यं सुधेष्टकादिभि
र्निर्माणमाचार्यकृत्यं तत्तद्विमानस्थले देवप्रतिमादीनां
तत्तत्स्थलेषु नियोजनम् । यथा कारणे :-
विमानाद्यर्पितानां तु चित्राणां च तथा भवेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

उद्धृत्य कल्पितानां तु जीर्णोद्धारविधानतः।
प्रतिष्ठामेव कुर्वीत विमानोक्तामतान्द्रितः।
उद्धारे तु विमानानां कर्तव्या या कृता भवेत्।
सेदानीं कथ्यते तस्य विमानस्य चतु(र्दिक्षि)।

वीरतन्त्रे :- प्रासादस्य चतुर्दिक्षु प्रपां कृत्वा तु पूर्ववत्।
मध्यमे वेदिकां कुर्या शालिनां विकरैस्ततः।
वेदिका मध्यमे स्थाप्य दिशादैवतकुंभकात्।
सकूर्चान् सापिधानांश्च सवस्त्रान्वितपूरितान्।

अंशुमति :- प्रासादकलशात्तीशे? पूर्वे चंद्रघटं न्यसेत्।
दक्षिणे रुद्रकुंभश्च विष्णुकुंभन्तु पश्चिमे।
२१b उत्तरे ब्रह्मकुंभश्च विन्यसेत्तु यथाक्रमम्।
परिवारघटान् स्थाप्य तत्तत्कुंभप्रदक्षिणम्।

वीरतन्त्रे :- विघ्नेशं दक्षिणे स्थाप्य दुर्गाकुंभं तु चोत्तरे।
स्थापयेदष्टकुंभांस्तु अन्तरे तु विशेषतः।
दिशान्तु देवतामूलं विन्यसेत्सरमध्यमे।
संपूज्य गन्धपुष्पाद्यैः स्वस्वमन्त्रेण देशिकः।
पायसान्नं निवेद्याथ दद्यात्ताम्बूलमुत्तमम्।
स्वर्णं तत्पार्श्वके न्यस्त्वा दक्षिणे मुष्टिमात्रके।
भेरीनादं समभ्यर्च्य पश्चाद्धोमं समाचरेत्।

अत्र तत्पार्श्वकशब्देन ईशानदिक्स्थितप्रासादकुंभा बाह्यतशिवस्य पार्श्वमुच्यते। स स्वर्णो विमानस्वर्ण इति गम्यते। वीरतन्त्रे :-

वेदिका पूर्वदिग्भागे अग्निकुण्डं तथोच्यते।
एवमेव प्रकारेण चतुर्दिक्षु च कारयेत्।

अंशुमत्याम् - आचार्यस्त्वीशदिक्कुण्डे शिवाग्निं प्रतिकल्पयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वीरतन्त्रे :- ततो होमं प्रकर्तव्यं अग्निकार्यं च पूर्ववत्।
तत्तद्देवाङ्गमूलैस्तु विधिवत्स्थापितेऽनले।
समिधाज्य चरूणां तु प्रत्येकं तु दशाहुतिः।
शक्तिशेषं ततो नित्वा प्रभाते देशिकोत्तमः।
कृत्वा नित्यबलिमभ्यर्च्य कलशेषु च देवताः।

वीरतन्त्रे :-

पालाशं पूर्वदिग्भागे ~~श्वत्थं~~ दक्षिणे श्वत्थमेव च।
औदुम्बरन्तु वारुण्यां प्लक्षामुत्तरभागके।
22a विघ्नेशस्य शमिः प्रोक्तो दुर्गायास्तु पलाशकम्।
अष्टोत्तरशतं वापि पञ्चाशद्वापि शक्तये।
तत्तन्मूलेन विप्रेन्द्राः प्रत्येकं तु शताहुतिः।
अन्ते :- पूर्णाहुतिंश्च सर्वत्र शिवास्त्रेण प्रदापयेत्।
ततश्चैशानकोणेषु कुंभेष्वावाहितं शिवम्।
खड्गाद्यैर्वा विन्यसेद् मूलमुच्चरन् सुलमाहितः।
ततस्तन्नाभिविच्छायितं नेत्रादि क्रमेण तु।
कुंभस्थान्विन्यसे देवांश्चतुरः पूर्ववत्सुधीः।
अथोतः क्रमतस्सर्वकलशैरभिषेचयेत्।
ततोऽस्त्रं खड्गमन्यत्र सुगुप्तं सन्निधापयेत्,
सर्वं कृत्वा क्रियां पश्चात् प्रासादं सुमुहूर्तके।
उद्धृत्य कारयेत्पश्चात् प्रासादं विधिना सुधीः।
क्रियाक्रमद्योतिकायामप्येवमुक्तम्। यथा -
एव एव विधिः प्रोक्तो जीर्णोद्धारणमुद्धृताम्।
खड्गे मन्त्रगणं न्यस्य कारयेन्मन्दिरान्तरम्।
शम्बरात्पूजयेद्धाम लिङ्गर्थ्यं खड्गसङ्गतान्।
आचार्यलिंगलक्षाद्यं पूर्वमानेन कारयेत्।
अथवा तत्तद्दुर्गं देवादि बाललिंगं वा यान्ततः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदुक्तं तत्रैव - भौमादि स्थूपिपर्यन्तं वर्णप्रतिविशेषतः ।

अलक्षणञ्च जीर्णञ्च लक्षणोक्तक्रमेण तु ।

226 तत्तद्वर्णं संकल्पिता देवान् बाललिंगे तु योजयेत् । इति ।

स्वायम्भुवलिंगस्य बाललिंगाभावात् स्वायम्भुवे संकोचपटले तत्तद्धामोद्धारविषये योजना प्रकार उक्तः । स्व

स्वायंभुवादिके जीर्णे लिंगे संयोजयेत्सुधीः ।

अथवा चललिंगे वा विशेषेण सुयोजयेत् ।

कारणे - देवतांश्च तद्विमानस्थान पीठाग्रे वा सुयोजयेत् ।

दैविके मानुषे वापि पदे संयोजयेत्सुधीः ।

पैशाचे तु न कर्तव्यं मण्डपचान्तरालके ।

अष्टदिक्षु च कर्तव्यं भद्रपीठे यथा पुनः ।

चिरन्तविमानं संकल्प्य तत्तेजोन्नानात्य रक्षयेत् ।

पीठाग्रे चाथ लिंगे वा यथायुक्ति यथारुचि ।

विमानस्थापने काले यथापूर्वं नियोजयेदिति ।

एवं देवतायोजन शिलादि कृत्ययोरनन्तरम् । विमान-प्रतिष्ठायां सत्यां पुनश्च विधिवदागमोक्तप्रकारेण कललिंगे स्वशक्तिं बाललिंगाधावाहिता शक्तिं न्यसेदावाहयेदित्यर्थः । तथोक्तमंशुमति -

प्रासादं देहमित्युक्तं देहीलिंगमिति स्मृतम् ।

देहहीनं कृतं कर्म तत्सर्वं निष्फलं भवेत् ।

तस्मात्सर्वप्रयत्नेन विमानस्थापनं गुरुः ।

स्थूपिकील प्रतिष्ठां च देवता स्थापनं तथा ।

शिलासंप्रोक्षणञ्चैव समतंत्रेण कारयेत् ।

पृथक् तन्त्रेण वा कुर्यात्सर्वांगं देशिकोत्तमः ।

मेदिनी संग्रहं बालस्थापनं प्रथमेष्टका ।

गर्भकूर्चेष्टका धातुलिंगं संस्थापनं तथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

23a संप्रोक्षणकर्मणैव यष्टांगमिति कीर्तितम् ।

सूक्ष्मभेदे - सांनिध्येन विमाने तु स्थापनं विधिमार्गतः ।

विमान स्थापनम् शिवलोकमवाप्नोति पूज्यमानस्सदामरैरिति ।

विमानस्थापनं तु विस्तारेण प्रदर्शितम् । कारणे -

अतः परं प्रवक्ष्यामि विमानस्थापनं परम् ।
सर्वपापहरं नृणां सर्वसिद्धिप्रदायकम् ।
हैमेन वाथ ताम्रेण दारुणा शिलयाथवा ।
इष्टकाभिस्सुधाभिः हर्म्यं कृत्वा सलक्षणम् ।
उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
शरद्वसंतयोः श्रेष्ठं विमानस्थापने मुने ।
शुभवारे शुभतिथौ प्रतिष्ठां समुपाचरेत् ।
विमानस्थापने हीने हर्म्याणां स्यान्निष्फलम् ।
तस्मात्सर्वप्रयत्नेन प्रासादस्थापनं नयेत् ।
अंकुरार्पणपूर्वं हि विमानं पूर्वोक्तविधिना गुरुः ।
प्रासादस्य चतुर्दिक्षु मण्टपं संप्रकल्पयेत् ।
नवहस्तैरष्टहस्तै रथ्या वा सप्तहस्तकैः ।
कलास्तम्भयुतं वाथ द्वादशास्तम्भसंयुतम् ।
मण्डपस्य त्रिभागैका मध्यभागे तु वेदिका ।
रत्नमात्रसमुत्सेधा दर्पणोदरसन्निभा ।
कुण्डानि परितः कुर्यात् मानुषे तु पदे क्रमात् ।
युगाश्रं योनि खण्डेन्दु त्र्यस्रवृत्तान्यथाब्जकम् ।
23b सप्ताश्रञ्चैव पद्मञ्चैन्द्रादाशासु कल्पयेत् ।
प्राक्कुण्डवेदिका मध्ये वृत्तमन्त्रप्रधानकम् ।
हैम्यपाग्रे मण्टपं त्वेवं कारयेल्लक्षणान्वितम् ।
मण्टपेष्वेव मध्येषु कुर्यात्सर्वं युगाश्रकामिति ।

वीरतन्त्रे विशेष उक्तः । प्रासादस्य चतुर्दिक्षु चतुरश्रं तु कुण्डकम् ।
नागरस्य लिङ्गिप्रोक्तो द्राविडस्य तु वृत्तकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ऐशान्यपार्श्वे चन्द्राभं कुण्डं सर्वं प्रकल्पयेत्।
कारणे — नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु।
पञ्चाग्न्यायतनानि स्यात् विदिशासु विवर्जयेत्।
प्रासादस्य पुरो भागे कुर्यात् स्कन्दस्य मण्टपम्।
विष्णोः पश्चिमदिग्भागे सौम्ये तु विघ्नमण्टपम्।
दक्षिणामूर्तिदेवस्य याम्य भागे प्रकल्पयेत्।
अलंकृत्य वितानाद्यैः मण्टपानि विशेषतः।
पश्चिमद्वारहर्म्यस्थं देवमेव प्रकल्पयेत्।
स्कन्दस्यैव तथा विष्णोः व्यत्ययत्वेन प्रकल्पयेत्।
ब्राह्मणान् भोजयेत्पश्चात् मण्टपान् प्रतिबुद्धिमान्।
पश्चादुच्छिष्टमुद्वास्य गोमयेनोपलेपयेत्। इति।
कामिके — ततः प्रासाददेहस्य वेराणां दृष्टिमोचनम्।
मध्वाज्यधान्यगोविप्रकन्यानां दर्शनाद्द्विजाः।
तत्तद्धृदयमन्त्रेण कृत्वा संप्रोक्ष्य गन्धतः।
संपूज्य गन्धपुष्पाद्यैः प्रासादं प्रोक्षयेत्ततः।
२५a कारणे — विमानाभ्यन्तरे पश्चाद्वास्तुहोमं समाचरेत्।
पर्यग्निकरणं हर्म्ये कुर्यात्तेनैव वह्निना।
प्रासादं तन्तुना वेष्ट्य दर्भमालाभिरावृतम्।
स्तूप्याद्युपानपर्यन्तं नववस्त्रेण वेष्टयेत्।
दुकूलपट्टदेवाङ्गैः कार्पासैश्च विभूषयेत्।
कामिके — वस्त्रैराच्छाद्य सर्वं तु दर्भैः पुष्पैः परिस्तरेत्।
मण्टपं संप्रविश्याथ पुण्याहं वाचयेत्ततः।
कारणे — द्वारपूजादिकं सर्वं स्नापनं क्रमवन्नयेत्।
वेद्यूर्ध्वे स्थण्डिलं कुर्यादष्टद्रोणैश्च शालिभिः।
(न्य)
पूर्वे सुरक्तधान्यैस्तु दक्षिणे श्वेतशालिभिः।
पश्चिमे कृष्णधान्यैस्तु सौम्ये पीतशालिभिः।

Center for Shaiva Studies, Pondicherry Collection

तदर्धैः स्थण्डिलैर्युक्तं तदर्धैश्च तिलैरपि ।
नामैर्दर्भैः परिस्तीर्य स्थण्डिलं पूजयेत्तथा ।
अजिते — शान्तिमार्गं समभ्यर्च्य वेदिकादिषु पूर्ववत् ।
देवान् सर्वान् समभ्यर्च्य कुंभान्यं समाहरेत् ।
कारणे — बहुलाराशौ शिराद्यता पूर्वोक्तलक्षणैर्युता ।
शुक्लवस्त्रोत्तरीयधरा शुक्लमाल्याद्यलंकृताः ।
शुक्लगंधानुलिप्तांगाः पञ्चांगैर्लक्षणैर्युताः ।
स्कन्धादिमण्डपेष्वत्र कुर्यात्सर्वं पृथक् पृथक् ।
२५b पूर्वोक्तलक्षणोपेतान् घटान् संगृह्य वर्मणा ।
शुक्लवस्त्रावृतान् स कुर्यात् सापिधानकान् ।
नववस्त्रान् पल्लवोपेतान् विन्यसेत्स्थण्डिलोपरि ।
अजिते — द्रोणपूर्णान् घटान् पञ्चपूर्वलक्षणान्वितान् ।
पञ्च संस्थापयेन्मध्ये वेदिकासु समं ततः ।
प्रत्येकमष्टौ परितः तदर्धं परिमाणकान् ।
तादृशान् पञ्चकुंभांस्तु विन्यसेद्विदिशासु च ।
एवं विन्यस्य कुंभांस्तु पुण्याहं वाचयेत्ततः ।
ततः प्रासादमध्ये तु प्रोक्षयित्वा तदंभसा ।
पञ्चगव्येन संप्रोक्ष्य ब्रह्मपञ्चकमुच्चरन् ।
पुण्याहं वाचयित्वान्ते कौतुकं बन्धयेत्सुधीः ।
स्नाप्य पूर्वं शिवास्त्रेण तत्तद्भागस्थितस्य तु ।
देवस्य बद्ध्वा बद्ध्वा ततोन्येषामपि क्रमात् ।
गलस्थितानां देवानां प्रादक्षिण्यक्रमेण तु ।
स्वस्वहेतिं समुच्चार्य पूजनामपि बन्धयेत् ।
प्रणवं सम्यगुच्चार्य तत्त्वादीश्वरमादितः ।
सग्रीवं प्रस्तरं पादमधिष्ठानं तथैव च ।
वस्त्रैरावेष्ट्य मन्त्रज्ञः सद्यादि ब्रह्मभिः क्रमात् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

पश्चात्ततः प्रविश्याथ अभिषिच्य क्रमं ततः।
पञ्चगव्येन सर्वत्र प्रोक्षयेद्धर्ममार्गतः।
ततः पाद्यादिभिर्दैवं हविरन्नैः क्रमात्त्वालेत्।
ततो बहिर्विनिष्क्रम्य शाङ्करे मण्डपे गुरुः।
होतृभिस्सह मन्त्रज्ञैश्चतुर्भिस्सह मण्डपम्।
25a शिवास्त्रेण च संप्रोक्ष्य कृतवेद्यां ततो गुरुः।
पूजयेत्कुंभकान् देवान् तद्विधानमथोच्यते।
स्कन्धस्य मण्डपे वेद्यां शिवकुंभन्तु मध्यमे।
विन्यसेत्तस्य मध्ये तु पञ्चरत्नं विशेषतः।
ध्यात्वा सदाशिवं तस्मिन् शिवकुंभे तु विन्यसेत्।
वर्धनीं तस्य वामे तु तस्यां हेमं विनिक्षिपेत्।
ध्यात्वा मनोन्मनीं तस्यां तन्मूलेन तु विन्यसेत्।
स्कन्धकुंभं न्यसेद्धीमान् शिवकुंभस्य दक्षिणे।
पञ्चरत्नं क्षिपेत्तस्मिन् ध्यात्वा स्कन्दस्वरूपकम्।
तन्मूलं विन्यसेत्तस्मिन् गन्धपुष्पादिभिः क्रमात्।
तत्तदङ्गमन्त्रैश्च पूजयेद्विशेषतः।
लिङ्गमुद्रां च पञ्चाख्यां शक्तिमुद्रां प्रदर्शयेत्।
आभितस्तु घटानष्टौ पूर्वाशादिषु विन्यसेत्।
कुमारं षण्मुखञ्चैव सुब्रह्मण्यं गुहाष्टकम्।
सेनापतिं सुरेशानं कार्तिकेयं गुहं क्रमात्।
पूर्वादिषु घटेष्वेतान् न्यसेत्तद्बीजमन्त्रकैः।
तत्तदीशानमन्त्रेण गन्धपुष्पादिभिर्यजेत्।
ईशान्ये मण्डपे वेद्यां स्थण्डिलोपरि मध्यमे।
प्रधानं कुंभं न्यस्त्वा तु दक्षिणामूर्तिरूपकम्।
ध्यात्वा महेशबीजं तु विन्यसेद्घटमध्यमे।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

परितोष्य घटेष्वेतान् भवादीन् पूर्ववद्यजेत् ।
भवं शर्वं तथेशानं रुद्रं पशुपतिं तथा ।
उग्रं भीमं महादेवं यजेत्पूर्वादितः क्रमात् ।
25 b विष्णुमण्टपवेद्यां तु स्थण्डिलोपरि मध्यमे ।
प्रधानकुंभं न्यस्त्वा तु तन्मध्ये विष्णुरूपकम् ।
ध्यात्वा बीजं विन्यस्य हृदा गन्धादिभिर्यजेत् ।
संकर्षणश्च प्रद्युम्नो वासुदेवोनिरुद्धकः ।
रामो मत्स्यो नारसिंहो वामनः पूर्वादितः ।
क्रमेणोक्तास्तथा सर्वानष्टकुंभेषु पूजयेत् ।
ब्रह्म मण्टपवेद्यां तु स्थण्डिलोपरि मध्यमे ।
प्रधानकुंभं विन्यस्य तन्मध्ये ब्रह्मरूपकम् ।
ध्यात्वा बीजं न्यसित्वादौ पूजयेत्पुरुषेण तु ।
नाभिकृतं त्रयीमूर्तिञ्च पद्माक्षं पद्मयोनिकम् ।
चतुर्मुखञ्च धातारं पितामहमजं तथा ।
तत्तन्मन्त्रान्क्रमान्न्यस्त्वा ईशानो नामितो यजेत् ।
अजिते : सर्वं संपूज्य देवांस्तान् गन्धाद्यैः स्वस्वनामभिः ।
गङ्गाद्यध्ययनं कुर्यात् चतुर्दिक्षु क्रमेण तु ।
देशिको मूर्तिपैस्सार्धं होमकर्म समारभेत् ।
? अजिते : चत्वारस्तु प्रधानास्ते होतारो न पश्चकाः ।
मण्टपं प्रति चत्वारस्तैस्तैः पूजां समारभेत् ।
गन्धादिभिस्तथा देहान् मध्यकुंभेषु पूजयेत् ,
अग्रादिपतीन्कुंभेषु प्रागादिषु यथाक्रमम् ।
कारणे : अग्न्याधानादिकं सर्वं नित्यकार्योक्तमाचरेत् ।
26a पलाशखादिराश्वत्थन्यग्रोधाः प्लक्ष एव च ।
शमीबिल्वमपामार्गं पलाशं च क्रमेण तु ।
इन्द्रदिक्स्थकुण्डानां समिधः संप्रकीर्तिताः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्लक्षाश्वोदुम्बराश्चैव वटाः पूर्वादितः क्रमात् ।
पलाशं तु प्रधानस्य दक्षकुण्डे प्रकीर्तिताः ।
ततः प्रधानकुण्डेषु प्रधानं घटसंस्थितान् ।
देवानभ्यर्च्य सर्वत्र होमयेत्समिदादिभिः ।
समिदाज्य चरूंश्च लाजान् सर्षपांश्च यवांस्तिलान् ।
वैणवांशालिमाषांश्च निष्पावानि क्रमेण तु ।
तत्तद्ब्रह्मषडङ्गैश्च समिदादीनि होमयेत् ।
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ।
अजिते : होमकाले तु सर्वेषु मण्टपेषु गन्धादिभिः ।
चतुर्भिश्च चतुर्दिक्षु वेदैरध्ययनं भवेत् ।
सर्वशाखाकरं देशे भवेद्वा जपेत्ततः ।
गुरुः पूर्वोक्त मूलाग्रैः प्रत्येकं तु शताहुतिम् ।
आज्येन होमयेदन्ते विद्यांश्च ततो गुरुः ।
कुम्भान्ते व्याहृतिं हुत्वा भवनं स्पर्शयेत्ततः ।
कुम्भं प्रतिमां हुत्वा तत्तद्दिक्षु च वर्मणा ।
? सृष्ट्वा न भागं तु व्याहृतिं जुहुयात्ततः ।
तत्तत्काले स्वनाममन्त्रेण जुहुयाच्छतसंख्यया ।
एवं जागरणं कृत्वा रात्रौ सर्वे समाहिताः ।
वीरतन्त्रे : यथा प्रभाते विमले आचार्यः स्नानमाचरेत् ।
मन्त्रन्यासेन मार्गेण न्यासं कृत्वा विशेषतः ।
26 b ततो ब्लानहोमञ्च कर्तव्यं (ब्राह्मणो) --तमैः ।
समिदाज्य चरूणां तु प्रासादेन शताहुतिः ।
विमानबीजसंयुक्ता पञ्चविंशतिरुच्यते ।
सप्तमस्यान्त्यवर्गेण सम्पूज्य द्वितीयकम् ।
चतुर्दशस्वरोपेतं बिन्दुनादविभूषितम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(त्रि प्रे)

विमानस्य तु -- न्द्रा मूलमन्त्रमिहोच्यते।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम्।
जयादिरभ्याधानञ्च राष्ट्रभृच्चैव हूयते।
हुत्वान्ते तु तदस्येति पूर्णाहुतिमथाचरेत्।
आचार्ये दक्षिणां दद्यात् पञ्चाङ्गैर्भूषणैर्युताम्।
कारणे : पश्चाद्धेमांगुलीयाद्यैर्दैशिकान् संप्रपूजयेत्।
दक्षिणां प्रददेत्तेषां त्रिंशन्निष्कमनुत्तमम्।
तदर्धं मध्यमा ज्ञेया तदर्धं कन्यसा भवेत्।
दक्षिणां द्विगुणां दद्यात् गुरवे स्कन्दमन्त्रपे।
वीरतन्त्रे : शिवस्योपरि विप्रेन्द्रा कुंभमुद्वाहयेत्ततः।
प्रदक्षिणक्रमात्कृत्वा प्रासादस्योपरि स्थितः।
विमानमूलसंयुक्तं व्योमव्यापि समुच्चरन्।
पञ्चब्रह्मषडंगैश्च स्नापयेत्तद्विमानकम्।
पूर्वादीशानपर्यन्तं स्नापयेत्स्वस्वमन्त्रतः।
दिशामूर्तिश्च विप्रेन्द्रा स्नापयेत्स्वस्वमन्त्रतः।
गन्धपुष्पादिनाभ्यर्च्य हविर्दद्याद्विशेषतः॥
कारणे : स्तूपे वर्गे कलशस्थानं विन्यसेद्विधिपूर्वकम्।
देवं विमानमित्युक्तं देहलिंगमिति स्मृतम्।
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समाचरेत्।
ध्यात्वा सदाशिवं कुंभमन्त्रात्स्तूप्यग्रके न्यसेत्।
वर्धन्यां बीजमादाय तद्धाम्ने च प्रयोजयेत्।
27a गन्धपुष्पादि ... ददा .... ततः।
ब्राह्मणान् भोजयेत्तत्र शिवभक्तांश्च भोजयेत्।

Center for Shaiva Studies, Pondicherry Collection

एकद्वित्रि सहस्रैश्च ब्राह्मणान् भोजयेत्ततः ।
सप्तकन्यांश्च विप्रेन्द्राः वस्त्रादीनि च दापयेत् ।
कारणे :- एवं यः कुरुते (मर्त्यः) ..... स पुण्यां गतिमाप्नुयात् ।

प्राकारगोपुरमण्टपादीनां समानक्रियत्वादेकेनैव श्लोकेन तदुद्धारक्रममाह ।

प्राकारगोपुरसमण्टपवास्तुकुण्डं
मूलालयान्यपरिवारगृहे च जीर्णे ।
..... गविकले सति तत्तदंगं
सन्धाय सर्वविकले तु तदुद्धरेच्च ॥

प्राकार अन्तर्मण्डलान्तर्हारमध्यहारमर्यादमहामर्यादाख्याः गोपुराणि द्वारशाला द्वारशोभा .. द्वारहर्म्य द्वारगोपुराणि एकभूमिप्रभृतिषोडशपर्यन्तानि मण्टपानि चतुस्तंभादि-सहस्रस्तंभान्तानि वास्तु स्थण्डिलादि कुण्डानि चतुरश्रादीनि-वृ.कुं .. लयप्राप्तानि यानि परिवारगृहाणि विनायका-लयादीनि तेषु सर्वेषु सर्वद्वन्द्वानां भागैकवत् भाग इति । एकवद्भावादेकवचनम् । एतेषु जीर्णेषु सत्सु । जीर्णवत् किञ्चिदंगवैकल्ये सति तथा । सर्वांगवैकल्यश्चेति द्विविधम् । तत्र यत्किञ्चिदंगवैकल्ये सति तत्तदंगं सन्धाय सर्वांगवैकल्ये सति तथा पूर्वद्रव्यैः पूर्वप्रमाणैरेव उद्धरेत् । तदधिकद्रव्यैरधिकमानेन चोद्धारे न दोषः । तथोक्तं कामिके :- प्राकारे गोपुरे जीर्णे प्रतीते स्फोटनादिके ,
राज्ञो भयकरं प्रोक्तं शान्तिहोमं ततो नयेत् ,
ततः संप्रोक्षणं कुर्यात् सन्धानं स्फोटनादिषु ,
27 कृत्वा गन्धेन संप्रोक्ष्य शान्तिहोममथाचरेत् ।
तथा वास्तु विद्या प्रकाशे प्र आत्मप्राकारशालादौ विमाने प्रमुच्यते च ह ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पूर्ववद्वाधिकं हीनं पञ्चाष्टं वा ... मिलका
पञ्च प्राकारस्त्वेति प्राकारत्व त्रिप्राकारस्यैकप्राकारत्वं विवक्षितम्।
जीर्णोद्धारस्य यथा शाल्ले विधत्वा - तथा तत्रैव पञ्चप्राकारयुक्तं
वा त्रिप्राकारयुक्तं तु वा। एकप्राकार ... वा कल्पयेत्
कल्पवित्तमः। मर्यादावृतिकं यत्वा अन्तर्मण्डलकं तु वा।

शेषप्राकारकं त्यक्त्वा त्रिप्राकारमिहोच्यते।
अथवैव प्रकारेण त्रिप्राकारमिहोच्यते।
... एकलकं पञ्च मर्यादा मध्यहारकम्।
त्यक्त्वैवाद्यं तु शेषं च त्रिप्राकारमिहोच्यते।
एकदेशविहीनं चेत् पुनस्सन्धानमाचरेत्।
आलमन्ताद्विदीर्णं चेत् न तं समुच्चरेत्।
अदृष्टकां ततः क्षिप्त्वा प्राकारन्तु समारभेत्।
तस्याधीनं न कर्तव्यं कर्तव्यमधिकं शुभम्।
तथा। पौराण्यं देवसदनं पौराण्यं कूपमेव च।
पु ... प्रासादनश्येयं संत्यजेद्बुधः।
तेषां बहिः प्रदेशे तु कुण्डं भद्राकृतिं न्यसेत्।
अज्ञानात्कुरुते तेषां भङ्गं पश्चाद्दरिद्रभवेत्।
तस्मात्परिहरेत्तानि बहिरावरणं न्यसेत्।

28a गोपुरविषये सुप्रभेदे -
जीर्णे तु गोपुरे वा प्रासादस्योक्तवन्नयेत्।
अन्येषां मण्डपादीनां भवेत्तस्योक्तमार्गतः।
कामिके - मण्डपे परिवारे च परिवारालये पुनः।
अनु ... विधं प्रागवत् - विना कल्पयेत्ततः।
प्रागवत् प्रासादोक्तवदित्यर्थः। तथा निश्वासे -
मण्टपे जीर्णदेशे तु उद्धृत्य स्थापयेन्नवम्।

Center for Shaiva Studies, Pondicherry Collection

परिवारालये जीर्णे तद्वल्लंघानमाचरेत् ।

(कि)

का···: प्राकारमण्टपादीनां यज्जीर्णं तत्र तद्विजाः ।

कुर्यात्तत्पूर्ववद्धीमान् सुदृढं हि मनोहरम् ।

अन्यथा यदि कुर्याच्चेत् सर्वदोषावहं नृणाम् ।

स ··· तत्र सर्वं निष्फलमेव च ।

सूक्ष्मे : मण्टपे जीर्णकाले तु पूर्वोक्तविधिना कुरु ।

प्राकारे जीर्णिते तत्र सन्धानं पूर्ववत्क्रमात् ।

कर्णकूटादिहीनं चेत् ··· तत्तद्धरेत् ।

आद्येष्टिकायां विन्यासे शैलजे शैलजं क्रमात् ।

पुरातनं कृतात्कालात् प्राकारं न समं यदि ।

तेन मानेन कर्तव्यं शैलानामपि सर्वशः ।

इष्टकाजीर्णदेह · पुनस्सन्धानमाचरेत् ।

गद्यया शैलजैश्चैव तु मानाधिकं तथा भवेत् ।

एवमेव प्रकारेण गोपुरादीनि कारयेत् ।

द्वारशाखादिजीर्णे तु चन्दनानेव संग्रहेत् ।

२४८ स्थपतिश्च विशेषेण ·· मार्गेण कारयेत् ।

पश्चात्तेनैव संग्राह्यं नवभिस्तरगैः क्रमात् ।

पश्चात्तत्प्रदेशेषु योजयात्तत्पतिस्तथा ।

एवं विधिप्रकारेण अशक्तश्चेत्तु कारयेत् ।

कूटे च मूलिकायां तु ·· ले तत्तद्धरेत् ।

नवकर्म प्रकुर्यात्तु यथालाभस्य संग्रहेत् ।

वास्तु । कामिके :

जीर्णवास्तुं तु मानादेरददुष्टं मार्गमार्गितं ।

पुनश्शास्त्रोक्तमार्गेण अधिकर्माधिभिर्युतैः ,

··· यं विजयापूर्वं नृपतेर्मोदमावहेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पूर्वमानादि क्षीणं पुनः कर्म तु कारयेत् ।
यदि होमेन कुर्वीत सर्वदोषास्पदं भवेत् ।
कामिके :— च प्रक्षयो बाल्तौ विस्तारान्तु विपत्करौ ॥
स्वप्रमाणे यथाशास्त्रे विहितालंकृतान्विते ।
अप्रमाणेन्यथा चेत्तु तत्र दोषं न विद्यते ।
प्रशान्ता प्राङ्गुदग्वृ ... प्रतीच्यां रिपुनिग्रहः ।
दक्षिणे मारणं, स्यादि तस्मात् वृद्धिं न चेष्यते ।
तद्वान्तेः परितो वृद्धिः समा वा विषमापि वा ।
ग्रामादीनां गृहादीनां शालानां च विशेषतः ।
आ - - नो स्यात्च दीर्घाभ्यां हीनं मेदु मुनीश्वराः ।
समं वा योजयेत्तस्मा दधिकं वापि योजयेत् ।
पुरतः परितो वापि प्राग्युदग्दिशि वर्धयेत् ।
29a गृहमादिकयो शुभ संख्यायां प्रकल्पयेत् ।
सर्वथानोचितं हीनं कुर्याद्धलादिक्रमेण तु ।
उक्तानामपि सर्वेषां विशेषः काशिदिष्यते ।
हीनं कुर्यात्परतो वा समं वा तत्र पूर्ववत् । इति
सर्वज्ञानोत्तरे :— ग्रामखेटपुरे वापि पत्र यत्र विस्तारविस्तरे ॥
विच्छेदं न कुर्वीत महापुण्य चिकीर्षया ।
सर्वान् कामानवाप्नोति यथोक्तेन तु कर्मणा ।
इति कुण्डजीर्णोद्धारः ॥ अजिते :—
नित्याग्निकुण्डजीर्णे तु तत्पूर्वे तदन्तरे ।
सैकतं वर्तुलं कृत्वा तत्राग्निः कुण्डतो न्यसेत् ।
यागादि होमं तु कृत्वादौ तत्र होमं प्रकल्पयेत् ।
यावत्कुण्डसमाप्तिः स्यात् पश्चादग्निं निकेतने ।
स्थापयित्वा ततश्चापि यात्रा होमं तु कारयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ततस्तत्र प्रकुर्वीत नित्यहोमं विधानत इति ॥

परिवारजीर्णोद्धारः। कारणे :-

परिवारालये जीर्णे त्वालयस्योक्तवन्नयेत्।

पूर्वकृत्या पुनः कुर्यात् लक्षणेन विचक्षणः।

अन्यकृत्वा कृतं चेत्तु सर्वदोषसमुद्भवः।

स्थापने चोक्तदेशे तु तद्दिनारम्भमङ्गकैः।

उक्तस्थाने प्रकर्तव्य परिवारादिकं क्रमात्।

जीर्णिते चात्र बिम्बे तु चोद्धरेत्तं विशेषतः।

तत्तद्धामोग्रहे पीठं कृत्वा मूर्तिं समर्चयेत्।

29b स्थापनोक्तक्रमेणैव बिंबं संस्थापयेन्नवम्।

परिवारालयं पीठं प्राकारं गोपुरं तथा।

प्रतिमा मण्टपादीनि मण्टपा च सभास्तथा।

पुराद्युमाननीयापि पुनः वर्मादिका भवेत्।

स्वोक्तस्थाने गते वापि पुनर्बाह्यगतं शुभम्।

बाह्ये चैवादिमस्थाने कर्तव्यास्ते स लक्षणाः।

वातुले :- परिवारविहीने च शान्तिदोषविनाशनम्।

स्थापयेत्पूर्ववत्पश्चात् कृत्वा तत्स्थापनोक्तवत्।

परिवाराङ्गवैकल्ये पुनस्संधानमाचरेत्।

सूक्ष्मभेदे :- परिवारालये हीने पूर्ववत्परिकल्पयेत्।

तद्बिम्बे पतिते भिन्ने छिन्ने भेदे तथैव च।

हुत्वा तु बीजमन्त्रेण कुर्यात् बिम्बानि पूर्ववत्।

प्रतिष्ठां कारयेत्प्राग्वत् स्वेन स्वेन विधानतः।

अंशुमत्याम् :- प्राकारं बलिपीठञ्च मण्टपं गोपुरं तु वा।

परिवारालयं वापि जीर्णाभिन्नमथापि वा।

तत्तदङ्गं पुनः कुर्यात्तत्तद्द्रव्यैः तदर्णाकृतम्।

किरणे :- खण्डस्फुटितसंभारं प्रासादे यत्समारभेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रुद्रलोकमवाप्यैव तस्मिन् भोगमवाप्नुयात् ।
एवं संस्थापितं धाम ये पश्यन्ति नरोत्तमाः ।
पञ्चपातकिनो वापि तेऽपि यान्ति परां गतिम् ।

॥ इति जीर्णोद्धारः प्रथमपरिच्छेदः ॥

अथैवमालयजीर्णोद्धारं मुक्त्वा शार्दूलविक्रीडितवृत्तप्रयत्नेन लिङ्गलक्षणपूर्वकं जीर्णोद्धारमाह -

३०० लिङ्गं स्थावरजङ्गमात्मभिधया द्वेधा तु पूर्वं पुनः
षड्भेदं क्षणिकादिभेदवशतस्तत्रापि चोत्काशिनाम् ।
वस्वष्टावपि च सप्तधा च नवधा भेदाः क्रमात् स्युः
पुनः प्रोक्ता मानुषकं पुनर्दशविधं दारामुखाद्यैर्भवेत् ॥

लिङ्गं भूतानि लयमस्मिन् गच्छन्ति लिङ्गं तदुक्तं सूक्ष्मभेदे - लयं गच्छन्ति भूतानि संहारे निखिलान्यथा
सृष्टिकाले तु सृष्टानि तस्माल्लिङ्गमुदाहृतमिति ।
एतल्लिङ्गं स्थावरजङ्गमात्माभिधया स्थावरजङ्गमश्चेति । आत्माभिधाभिधाय भेदस्य तयो द्वेधा स्थावरजङ्गमं इति द्विधेत्यर्थः । तदुक्तं कारणे -

स्थावरं जङ्गमं चेति द्विविधं लिङ्गमुच्यते ।
शिलमयन्तु यद्रूपं मञ्जलिढणु ह्यौंपुतम् ।
गिरयश्चकुकुलैर्युक्तं स्थावरं लिङ्गमुच्यते ।
शैवाद्यन्यानि सर्वाणि जङ्गमं लिङ्गमुच्यते ॥ इति ।

तत्पुनः द्विविधमपि पुनः क्षणिकादिभेदवशात् क्षणिक-मृण्मय रत्नज लोहज दारुज शैलज भेदात् । षड्भेदम् । तथोक्तं सूक्ष्मभेदे -

क्षणिकं चैव मृल्लोहं रत्नजं दारुजं तथा ।
शैलजं चैव विज्ञेयं षड्भेदं लिङ्गमुच्यते । इति ॥

तत्रापि भेदानाह । तत्रापि चेति । अर्कद्वादशभेदाः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

30b अग्नितौ द्वौ भेदौ । वसु अष्टभेदाः । पुनरष्टभेदाः
सप्तधा सप्तभेदाः नवधा नव भेदाः । एवं क्रमात् ।
क्षणिकादीनां भेदाः स्युः । क्षणिकं द्वादशभेदम् ।
मृण्मयः द्विभेदं दारुजमष्टभेदम् । लोहजं चाष्टभेदम् ।
रत्नजं सप्तभेदम् । शैलजं नवभेदमिति । तथाचोक्तम्
सूक्ष्मभेदे — क्षणिकं द्वादशप्रोक्ता मृण्मयं द्विविधं पुनः ।
दारुजं चाष्टधा प्रोक्ता मण्डपाधालोहजं स्मृतम् ।
सप्तधा रत्नजं चैव शैलजं च चतुर्विधमिति ।
तेषां लक्षणफलं चापि सूक्ष्मभेदे —
रत्नजं लोहजं चैव बाणलिंगं चलं स्मृतम् ।
शैलं चलाचलं प्रोक्तं मृण्मयं दारुजं तथा ।
क्षणिकानां फलं वक्ष्ये सैकतं मोक्षकांक्षिणाम् ।
तण्डुलं विभवार्थानां मनमन्नप्रदं स्मृतम् ।
नदी कुड्कुम लाभस्यात् गोमयं रोगनाशनम्
नवनीतं मनोह्लादं रुद्राक्षं ज्ञानवर्धनम् ।
गन्धं सौभाग्यकांक्षिणां कूर्चमुक्त्यार्थिना स्मृतम् ।
आयुष्यवर्धनं पुष्पं गुडमिष्टार्थसिद्धिदम् ।
पैष्टं पुष्टिप्रदं प्रोक्तं क्षणिकानां फलं भवेत् ।
गतेषां चैव लिंगानां न प्रमाणमवारितम् ।
मृण्मयं इजफलदं पक्वापक्वादि प्रभेदकम् ।
शुद्धदेशे मृदं ग्राह्य पूजामार्गं तथोनिकम् ।
कृत्वा द्वधमिदं पक्त्वा तथापक्त्वामिहोच्यते ॥
31a कामिके — श्वेतालमृदमादाय पयस्तैलाद्विमिश्रितम् ।
यवगोधूमचूर्णाद्यं पयो वृक्षत्वचयान्वितम् ।
पिच्छिलेन सुगन्धेन चूर्णत्यालोड्य संमृदा ।
श्रीवेष्टकं सज्जरसं तथा गुग्गुलुशर्कराः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वक्ष्यनिर्यासंयुक्तमथलेके प्रलिप्तितः।
तेषां मया संख्यया कृत्वं मृदं गृहीतदेशिकः।
सूक्ष्मभेदे :- सूर्याशालोऽयं समृद्धमालपक्षः। लिंतं तथा।
रत्नबीजसमायुक्तमथकं अंगमाचरेत्। लोहजाद्भेदा यथा -
सौवर्णं रजतं ताम्रं कांस्यमाकूटं (स्कू) तथा।
आयसं लिडकं चैव त्रपुकं चेति लोहजम्।
सौवर्णं श्रीप्रदं प्रोक्तं रजतं राज्यलिङ्गदम्।
ताम्रपुत्रप्रदं चैव विद्रुवं कांस्यमेव च।
आरकूटं तथोच्चाटे क्षयकारकमायसं।
शीसजं लोगकरणं त्रपुचायुष्यवर्धनम्।
एवं तु लोहजं प्रोक्तं ततोरत्नजमुच्यते।
मौक्तिकञ्च प्रवालञ्च वैडूर्यं स्फटिकं तथा।
पुष्यं मरकतं नीलं रत्नजं संप्रकीर्तितम्।
लोहरत्नादिके लिंगे पूजाभागं तपीठकम्।
यथा लाभ प्रमाणेन स्फटिकादीनि कारयेत्।
स्फटिकादिकं कर्तव्य। त्रिभागैरेव पीठिका।
तदायाम गुविस्तारा पिण्डिका इष्टमदा स्मृता।
३८ एकांगुलं समारभ्य आचतुर्विंशदंगुलात्।
लोहजं लिंगामित्याहुर्लक्षणोद्धारणं विना।
दारुजाद्यकं वाप। शमीमधुक दुद्रुमकंठकारं (दुद्रुर कार्णिकार) तलैव च।
तिन्दुकार्जुनकाश्चैव पिप्पलाडुम्बरं तथा।
कामिके भेदः उक्तः यथा -:
खदिरं चन्दनस्सालो मधूकसरलो मतः।
बिल्वः कदम्बबदरा देवदारुश्च किंशुकाः।
पनसार्जुनाशोकाश्च क्षीरिणो रक्तचन्दनः।
बिन्दुसाराश्च ये वृक्षाः पनसान्वेत् मध्यमा। इति॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शैलं च ब्राह्मणां चतुर्वर्णानुसारेण चतुर्विधं । सुप्रभेदे –

शिलापि च सुविज्ञेया जाति भेदात्परीक्षयेत् ।

श्वेता रक्ता तथा पीता कृष्णा चेति चतुर्विधा ।

31b गोक्षीरवर्णशङ्खाभा ब्राह्मणानां प्रशस्यते ।

जपाबन्धूकपुष्पाभा नृपाणां प्रोच्यते क्रमात् ।

रजनी स्वर्णदृशा वैश्यानां तु प्रशस्यते ।

माषा गुग्गुलुसंकाशा शूद्राणां तु समीड्ता ।

सर्वेषां तु शिला कृष्णा सर्वसम्पत्करी स्मृता ।

स्राव्योषरजरक्लिन्ना तथाचार्कस्य रश्मिभिः ।

अग्निदग्धान्य दुग्धाया वर्जयेत्ता प्रयत्नत इति

इति दारुशिलां च दारुशिला संग्रहप्रकरणोक्तप्रकारेण गृहीतव्याः । शैलजे नवकभेदाः । यथा सुप्रभेदे –

दिव्यं स्वयंभुवं पूर्वं दैवतं गाणपं तथा ।

आसुरं सुरलिङ्गं च आर्षकं राक्षसं तथा ।

मानुषं बाणलिङ्गं च लिङ्गं नवविधं भवेत् । इति ।

एतेषां लक्षणं यथा ।

पताकेजर्जराकारा रुद्राक्षाकृतिरेव च ।

32a आज्यं वा मधुगन्धं वा पालाशा पर्वताकृति ।

इत्येते लक्षणं प्रोक्तं लिङ्गं स्वायंभुवस्य तु ।

दिव्यं स्वायंभुवं पूर्वमुत्तमोत्तममेव च ।

दैवतं गाणपं प्रोक्तं मध्यमोत्तममेव च ।

आसुरं सुरलिङ्गं च आर्षं चैवाधमोत्तमम् ।

मानुषं लिङ्गमेवोक्तं मध्यमं त्वधमं भवेत् ।

बाणलिङ्गस्य नैवोक्तं लक्षणं तु विसर्जयेत् ।

अत्र दैविकादिलक्षणमापठ्यते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दैविकञ्चार्षकञ्चैव गाणपं मानुषं तथा ।
एवं चतुर्विधं लिङ्गं दैविके लक्षणं शृणु ।
दीर्घाकारं सर्वलिङ्गं निम्नोन्नतसमान्वितम् ।
रेखाकोटरसंयुक्तं टंकस्थलसमायुतम् ।
सर्वोन्नतमुखे धारा कराञ्जलिपुटाकृति ।
ब्रह्मसूत्रविहीनञ्च दैविकं तदिहोच्यते ।
कूष्माण्डस्य फलाकारं मातुलुंगफलाकृति ।
उर्वारुक फलाकारं कपित्थस्य फलाकृति ।
तालीफलवदाकारं गाणपं लिङ्गमुच्यते ।
मूलस्थूलं सर्वलिङ्गं नारिकेलफलाकृतिः ।
लिङ्गमार्षकमाख्यातं ब्रह्मसूत्रविवर्जितम् ।
द्वारं वा गर्भमानं वा हस्तमानमथापि वा ।
शिवशास्त्रोक्तमार्गेण शिरोवर्तनया युतम् ।
ब्रह्मसूत्रसमायुक्तमेतं मानुषमुच्यते ।
३२८ कामिके — स्वायंभुवं बाणलिङ्गं दैविकं चार्षकान्त्वाति ।
गाणपं मानुषं लिङ्गं बहुप्रकारं प्रकीर्तितम् ।
स्वयमेवोत्थितं लिङ्गं स्वायंभुवमुदाहृतम् ।
शैवेन संस्कृतं यत्तु बाणलिङ्गमुदाहृतम् ।
दैवैः संस्थापितं दैवमार्षकं ऋषिपूजितम् ।
गणैः संस्थापितं लिङ्गं गाणपं तदुदाहृतम् ।
मानुषं मनुजैरीशैः स्थापितं तदुदाहृतम् । इति
मानुषलिङ्गं च दशभेदा यथा लिङ्गनिर्णये —
समालिङ्गं वर्धमानं शैवाधिकयञ्च स्वस्तिकम् ।
सार्वदेशिकलिङ्गञ्च त्रैराशिकसहस्रकम् ।
धारालिङ्गञ्च वै.शैवयं ध्रुवलिङ्गमुदाहृतम् ।
लिङ्गस्य दशभेदं स्यात् मानुषे तु प्रकीर्तितम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्वायंभुवादिलिंगानां स्थानमानं न विद्यते ।
किरणे तु - स्वयंभु भूतलिंगस्य स्थापितस्य महर्षिभिः ।
दैवैर्वा स्थापितस्यापरस्यमानं न विद्यते ।
तल्लिंगाकृतिरूपेण नामभेद पृथक् पृथक् ।
ज्ञातव्य हि फलं चापि साधकेन यथार्थतः ।
सुप्रभेदे -: चतुरश्रमधोभागमष्टाश्रं मध्यमं भवेत् ।
तदूर्ध्वं वृत्तमेव स्यात् त्रिभागं सर्वसम्मतम् ।
धर्मलिंगमिति प्रोक्तं वर्धमानमतः शृणु ।
चतुर्विंशतिकायामे सप्ताश्रं चतुरश्रकम् ।
अष्टाश्रमष्टभागेन नवांशेन च वृत्तकम् ।
वर्धमानमिदं लिंगं शिवाधिकमतः परम् ।
33a आयामं दशधा कृत्वा चतुरश्रं त्रिभागतः ।
अष्टाश्रस्य त्रिभागेन चतुरंशेन वृत्तकम् ।
शिवाधिकमिदं शस्तं भुक्तिमुक्तिफलप्रदम् ।
स्वस्तिकं लिंगलक्षणं कामिके -
नवधा लिंगमानेन द्विचतुर्द्विगुणादयः ।
स्वस्तिकं लिंगमाख्यातं अन्यथा च न विद्यते ।
त्रिंशद्भागे शिवायामे नवा रुद्रादिभागतः ।
भक्त्वास्त्ववयवा तेषां भागमानादिकक्रमात् ।
त्रयस्त्रिंशत्कृते लिंगे स्वस्तिकं रुद्रयोग्यकम् ।
सार्वदेशिकलिंगलक्षणं यथा कामिके -:
सार्वदेशिकलिंगानि विद्यते गर्भमानतः ।
प्रासादे गर्भमाने तु पञ्चांशे त्रिभिरुन्नतम् ।
नवांशे पञ्चभिर्मध्य भवत्यर्धेन कन्यसम् ।
तथावान्तरभेदेन भवन्त्यन्यानि षट् पुनः ।
तत्तन्मन्दिरमानेन त्रयस्त्रिंशत्प्रमाणकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विंशत्यंशे कृते गर्भे दशांशमधमं भवेत् ।
एकादशांशैर्मध्यं स्यात् भागैर्द्वादशभिर्वरम् ।
मध्यमे षड्विभागेन नवलिंगोदयस्तु वा ।
गर्भं तु नवधा कृत्वा नवलिंगोच्छ्रयस्तु वा ।
अधमं गर्भपादं वा त्रिपादं चोत्तमं भवेत् ।
मध्यमे द्वि विभागे तु तन्तदन्तरभेदतः ।
त्रयस्त्रिंशत्प्रमाणानि लिंगानि कथितानि च ।
अथवा गर्भगेहस्य ज्यंशैकमधमं भवेत् ।
गर्भार्धं मध्यमं ज्येष्ठं पञ्चत्रिंशत्परं मतम् ।
पूर्ववन्मध्यमं कृत्वा त्रयस्त्रिंशद्भवन्ति हि ।
33-6 एकहस्तं समारभ्य चैकैकांशेन वर्धनात् ।
नवहस्तप्रमाणान्तं मानं स्याल्लिंगदैर्घ्यके ।
एकविंशति भागेन गर्भगेहे विभाजिते ।
त्रयोदशांशकं तत्तु दशांशं मध्यमं भवेत् ।
पूर्ववद् मध्यमं कृत्वा त्रयस्त्रिंशत्प्रमाणकम् ।
लिंगायामे विकारांशे चतुर्द्विकरवर्जितः ।
षड्विभागाद्विशेषैर्लिंगं विस्तारं परिकीर्तितम् ।
गायत्र्यंशं तु लिंगोच्चे पञ्चभिर्वा तु विस्तरः ।
अथवाष्टदशांशे तु लिंगोच्चे पञ्चभागकम् ।
चतुर्भागोथवा लिंगविस्तारः परिकीर्तितः ।
दैर्घ्यं त्रिसप्तधा कृत्वा एकस्वाष्टधिभागतः ।
विस्तारकथितं ह्यात्र लिंगानां मुनिपुङ्गव ।
द्वारस्तंभादिभिश्चैव मानं लिंगे समुद्धृतम् ।
भागं नवधा लिंगानि विभजेत्तानि चांशकैः ।
आयामस्तु भवेदैर्घ्ये शैवां विभजेद्यथा ।
षोडशांशं समारभ्य चतुर्विंशतिसंयुतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

श्री. F-41

शतांशं विभजेत्तत्र चैकांशमतयोजयेत् गुरुः ।
त्रैराशिकं लिंगलक्षणं यथा । कामिके :
अर्चनं नवधा कृत्वा आत्माद्या त्रिविभागतः ।
षट्सप्तांशकं भागैस्तु ब्राह्मे रुद्रादिषु क्रमात् ।
त्रैराशिकमिदं लिंगं शूद्राणां तु प्रशस्यते ।
सहस्रादिलिंगलक्षणं शिवालयनिर्माणदीपिकायां अस्माभिः दर्शितं तत्रैवावधार्यताम् ॥ धारालिंग मुखलिंगलक्षणं यथा सुप्रभेदे : धारालिंग मुखं लिंगं शृणुवत्स समाहितः ।
पञ्चधारा सप्तधार नवधार दशधारकाः ।
34a धाराषोडशविंशाच्च त्रिंशच्चाष्टविंशति ।
अष्टमामूर्ध्निपर्याय नवाद्यं वाधिति मानतः ।
पूजाभाग त्रिधा कृत्वा ऊर्ध्वभागं मुखं भवेत् ।
पञ्चमूर्ध्निचतुर्वक्त्रं ग्रीवा चैव समन्वितम् ।
ओत्राक्षौ द्वादशाक्षं च सर्वलक्षणसंयुतम् ।
लिंगाकारमथोत्तस्य पिण्डिका लक्षणं शृणु ।
कारणे : धारालिंगमहं वक्ष्ये शरकान्त्य प्रजापते ।
पादादिमूर्ध्निपर्यन्तं धारालिंगं प्रशस्तकम् ।
अष्टौ वेदास्त्रकं कुर्यात् तदूर्ध्वे द्व्यष्टधा यथा ।
शताद्विधिमहाप्राज्ञ सर्वकामप्रसादकम् ।
ऊर्ध्वे बीजशधाराश्च भोगार्थी लभते सुखम् ।
एवं क्रमेण संयुक्तं धारालिंगमिति स्मृतम् ।
शिरसो वर्धनं कुर्यात् तच्चतुर्विधमुच्यते ।
छत्राकारं तु विप्राणां नृपाणां कुक्कुटाण्डकम् ।
वैश्यानां चैव अर्धेन्दु शूद्राणां बुद्बुदाकृति ।

Center for Shaiva Studies, Pondicherry Collection

कृत्वा लिंगविस्तारं षड्भागेन समं बुधः।
तस्यैव द्विभागेन वर्तितं गप्वाकृतिः।
विस्तारं तु त्रिधा कृत्वा त्रिभागेन तु वर्तितम्।
अर्धचन्द्रमिति प्रोक्तं सर्वकामफलप्रदम्।
कुक्कुटाण्डं भवेत्तत्र विस्ताराधेन वर्तितम्।
अथवा विभजेत्तारं सप्तार्धेन तु वर्तितम्।
छत्रशीर्षकमित्युक्तं सर्ववर्णेषु योग्यकम्।
मानहीने महाव्याधिरधिके शत्रुवर्धनम्।
नाहहीने तु दारिद्र्यं शिरोहीने धनक्षयम्।
मूलहीने विनाशस्स्यात् सूत्रहीने कुलक्षयः।
तस्मात्सर्वप्रयत्नेन कारयेल्लक्षणान्वितम्।
मुखलिंगं ततो वक्ष्ये सर्वकामार्थसाधनम्।
३५-८ पूजाभागं समस्तं तु षडंशं विभजेत्क्रमात्।
त्रयोदशांशं तत्मुखमवधिः कारयेत्ततः।
चतुराननं चतुर्वक्त्रं त्रिवक्त्रं चैकवक्त्रकम्।
चतुर्दिक्षु चतुर्वक्त्रं त्रिवक्त्रं पृष्ठहीनकम्।
पूर्वैकवक्त्रमूर्ध्वं तु मुखमानेन बुद्धिमान्।
लिंगविस्तारमानेन त्रिगुणं पीठविस्तरम्।
कण्ठस्य त्रिगुणार्धं वा लिंगदैर्घ्यं समन्तु वा।
गर्भगेहं त्रिधा भज्य भागैकं पीठविस्तरम्।
लिंगमानेन हर्म्यं स्यात् लिंगमानेन पिण्डिका।
पूर्वाकृतिर्यथा पिण्डिं तथा कुर्यात्पुनः पुनः।
अन्याकृतिं न कर्तव्य कर्तव्याधि त्रिनाशिनी।
इत्यादि बहुवक्तव्यमस्ति विस्तारभयान्नेह लिख्यते।
एवं लिंगलक्षणमुक्त्वा पूर्वोक्तप्रयत्नेन सामान्येन लिंग-
जीर्णोद्धारमाह ः

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जीर्णाद्यानि तु बौद्धागमवचः प्रोक्तानि लिंगान्यपि
त्याज्यान्यन्यकृतानि सिन्धूरनदीस्रोतोरिपुं मन्त्रकैः ।
कोपावेशवशोद्भवानि तु पुनः यच्चपुण्यानि स्फुटं
तान्येवाद्य यथेष्टलब्धमपरं लिंगं गुरुः स्थापयेत् ॥

आगमवचः प्रोक्तानि कामिकाद्यागमवचः प्रतिपादितानि
जीर्णाद्यानि कालवशात्प्रमाददूजादिवैकल्येन जीर्णं लिंगमाद्यं येषां तानि बौद्धलिंगान्यपि त्याज्यान्यपि
लिंगोद्धारविधिना त्यक्तव्यानि तथाचोक्तं कामिके

जीर्णं दग्धं कृशं स्थूलं हीनमानादिकं तथा ।
भग्नञ्च न क्षतं लिंगमजनं यच्च दृश्यते ।
लक्ष्मोद्धृतं वक्रहतं स्फुटं स्फुलितं तथा ।
अभिचारकगर्भाढ्यं व्यंगांगं चेति कीर्तितम् ।
त्याज्यानि सर्वथा तानि लिंगानि बौद्धानि तु ।

35a सुप्रभेदे : लिंगं तु स्फुटितं भिन्नं जीर्णं छिन्नं तथैव च ।
ईदृशं लिंगं ततस्त्यक्त्वा स्थापयेत्तु नवीकृतम् ।

मोहशूरोत्तरे : हीनजीर्णं कृशं दग्धं स्थूलमानाधिकं हरे ।
लक्षणहीनमन्यच्च गर्भाढ्यं सपुष्पं स्फुटितं तथा ।
भग्नं च सक्षतं कृष्टं तथा वक्रहतं हरे ।
एवमादीनि चान्यानि लिंगानि परिवर्जयेत् ।

कालोत्तरे : ~~अपू~~ अपूज्यं सेवितं लिंगं बहुकालमपूजितम् ।
विधिहीनं तदुद्धार्यं सगर्भञ्च विशेषतः ।
इष्टयंगं तथा नाथं मानहीनं तदुद्धरेत् ॥ इति ।

अत्र लिंगोद्धारक्रम उच्यते । सुप्रभेदे :
उद्धारे जीर्णलिंगन्तु तस्योद्धारं क्रमच्छृणु ।
मण्डलं वर्तयेद्धीमान् शिवलिंगस्य दक्षिणे ।
संकल्प्यावाहनमाराध्य बाह्यपूजां समारभेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मन्त्रपूतहविर्दद्यां तदन्यायतने कृते ।
दूर्वा मधुद्रुवं वापि क्षीरेणातिलतण्डुलैः ॥
दशात्मना शिवांशैश्च पञ्चब्रह्मषडङ्गकैः ॥
प्रत्येकं शतमर्धं वा होमयेत्पञ्चविंशतिः ॥
लिङ्गस्य चलनार्थाय मूलेनैव शताहुतिः ॥
दद्यात्पूर्णाहुतिं तत्र सहस्राक्षीति मन्त्रतः ॥
कामिके :- अभिघाज्य तिलोपेतं हविषा च समन्वितम् ।
वस्त्रं तादूरलं कृत्वा समिदाज्यं गुरूत्तमः ॥
लिङ्गमभ्यर्च्य सन्तर्प्य त्रितत्वादि समन्वितम् ।
भागे भागे समन्त्रेण चाहुतीनां सहस्रकम् ।
कामिके :- लिङ्गस्य चलनार्थाय समाचर्य गुरूत्तमः ॥
सकलीकरणं कृत्वा भाजयेच्छिवलिङ्गिनः ॥
दृष्टिं कृत्वा तदाद्येन प्रविशेदालयं प्रति ।
356 ततो विज्ञापयेद्देवं प्रदीपवत्काहं ईश्वरम् ।
अत्योद्धारे कृते शान्तिर्भवतीति भवेद्द्विजाः ॥
तस्मात्तत्र विधानेन मादिशत महेश्वर ॥
एवं कर्मफलोपेतं शान्तिहोमं समाचरेत् ।
क्षीराज्य मधुदूर्वाभिः शिवेनाष्टसहस्रकम् ।
कृत्वा तदन्तिकं भित्ति त्रिधा स्नात्वा प्रपूजयेत् ।
कामिके :- व्यापकेश्वरशब्दं तु चतुर्थ्यन्तं प्रपूजयेत् ।
प्रणवादि नमोन्तं तु मूलमन्त्रमुदीरितः ।
व्यापकेश्वरशब्दश्च हृदयादिपदं ततः ॥
चतुर्थ्यन्तं प्रयोक्तव्यं प्रणवादि समन्वितम् ।
नमस्कारान्तसंयुक्तं हृदयाद्यङ्गपञ्चकम् ।
निर्बीजा बीजवत्कस्तु लिङ्गं च प्रणवालनं ।
कालोत्तरे :- कुशीभागानि संपृक्ष्या अस्त्रमन्त्रां जपेत्ततः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सहस्रार्धं तदर्धं वा शतार्धं शान्तिका हुतः ।
छत्रभागे यथा कार्या विष्णुरुद्रे यथाहितम् ।
तथा ~~घण्टेश्वरं~~ देवं व्यक्ताव्यक्तनियामकम् ।
~~तत~~ श्रुत्वा ततस्तुत्वा स्तुतं जप्त्वं प्रणवं चान्त्यमुच्चरन् ।
सत्यं कोऽपि तपः कश्चित् लिङ्गमाश्रित्य तिष्ठति ।
लिङ्गं त्यक्त्वा शिवाज्ञातो यथेष्टं तत्र गच्छतु ।
विद्या विद्येश्वरैर्युक्तं सांकुरत्र गमिष्यति ।
एवमुक्त्वा महास्त्रेण दत्वार्घ्यं तु पराङ्मुखम् ।
तस्माद्देवं समं वाद्य कुंभे संस्थापयेद्गुरुः ।
अग्रे स्थण्डिलसंयुक्ते स्वर्णवस्त्रसमान्विते ।
सकूर्चसापिधाने च सवस्त्रे पल्लवान्विते ।
तथा विधायां वर्धन्यां अम्बिकां स्थापयेत् गुरुः ।
संपूज्य गन्धपुष्पाद्यैः स्तुत्वानुगुणा निधापयेत् ।
ततः पाशुपतास्त्रेण प्रतिभागं सहस्रकम् ।
हुत्वा शान्त्यम्भसा प्रो . . . . .

(36a leaf missing) 37a . . . . .दि दोषरहितानि यदि तान्येव स्थापयेत् ।

तथाचोक्तं कामिके —:

तथैवा स्थापनीयानि यथैवानवपुराणानि हीति ।

अत्र विष्णुगजनदीरिपुम्लेच्छादिदृष्टेषु लिङ्गेषु चाल्लिङ्गमकर्तुं द्वादशवत्सरादिकालेनास्थलकर्थं तदपरमन्यं नूतनं लिङ्गं गुरुराचार्य स्थापयेत् । तदुक्तं सुप्रभेदे —

चालितं पतितं वापि नदीस्रोतो निपातितम् ।
गजेनोत्थापितं वापि चोरैरन्मेन्तकैरपि ।
बाल्लिङ्गं तत्र संस्थाप्य पूर्ववद्धेवमाचरेत् ।
गम्भीरे च नदीस्रोते लिङ्गे वा चालिते सति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अन्यत्र प्रतिमां वापि शतदण्डं तु योजयेत् ।
मूललिंगाद्दृश्यं नवलिंगन्तु पूर्ववत् ॥
कामिके — रिपुणा संगृहीतं चेल्लिंगं वा प्रतिमादिकम् ।
तद्राष्ट्रनाशो नृपति शत्रुभिः परिपीड्यते ।
सर्वयत्नात्तमादाय तत्रैव स्थापनाय च ।
लब्धं च लिंगबेराद्यं गूढदेशे निधाय च ।
लिंगोत्पाटनकर्तारं शिरच्छेदो वधोपरि ।
दण्डो न्यायानुसारेण राज्ञा धर्मादिवा तथा ।
लिंगोत्पाटनदोषाय शान्त्यर्थं घोरमन्त्रतः ।
सहस्रं होमयेदाज्य तिलैर्वा चरुणा च तम् ।
मधुत्रयसंयुक्तं सहस्रं दूर्वया इति ।
कृत्वान्ते स्थापनोक्त्या तु स्थापयेत्पूर्वभूतले ।
दक्षिणोद्धारणं चापि मोचनं जलवेशनम् ।
विहायत्रयं प्रकर्तव्यं स्थापकैस्तत्रदाक्षिभिः ।
अलब्धं लिंगबेराभ्यां यत्नेन स्थापयेन्नवम् ।
बालादर्वाक् तदूर्ध्वं चेत् ग्राम बाल गवादिषु ।
37 b प्रत्यहं शान्तिहोमं स्यात् कर्तव्यं स्थापनान्तिकम् ।
तदूर्ध्वं स्थापनं बाललिंगाद्यं यागहोदितम् ।
तस्मात्सर्वप्रयत्नेन मासात्रितयमध्यमे ।
संस्थाप्य बाललिंगाद्यं बालस्थापनवर्त्मना ।
ग्रहीतुं चोरचोराद्यैः फललिंगं कीदृशं च तत् ।
प्रतिमामुखलिंगं वा बाणलिंगादिकं तु वा ।
प्रत्यहं चैव मन्तव्यं स्थितमन्यत्र चेत् धृतम् ।
तदा युद्धेन जित्वा वा वित्तं दत्वाथवा परात् ।
आहृत्य लिंगबेराद्यः स्वस्थाने स्थापयेद्दृढम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

संवत्सरत्रयादूर्ध्वं लब्धं चेत्तन्मुनीश्वराः ॥
मूलस्थाने यथापूर्वं तद्ग्रन्थैतत्प्रमाणतः ।
संस्थाप्य मूललिंगाद्यमर्चयेदर्चनोक्तवत् ।
अज्ञानविधिपूर्वं चेदाकृतिर्वा गुरूत्तमः ॥
तत्स्थालादानुरूपेण यजमानानुरूपतः ।
लिंगमाप्याद्यविधिना स्थापयेदुक्तवर्त्मना ।
बाणलिंगं तु वा तां स्थापयेत्सर्वसिद्धये ।
बेरं वा दीपिकां वापि न्यासेनानेन कारयेत् ।
देवि विशेष देवो वा देवी वा केवला यथा ।
शत्रुभिः संगृहीता चेत् स्थितद्रव्यानुरूपतः ।
समाप्यान्तरं तस्मिन् प्रतिष्ठाख्यं समाप्य च ।

अजिते :- चोराद्यैश्च हृते लिंगे नादिजा प्रतिपादिते ।
दत्तयोनिगणं चेत्तु चोरादाहृत्य पूर्ववत् ।
देवान्तरं तस्य प्रतिष्ठाख्यं समाप्य च ।
३४a कल्याणं कारयेदन्ते निधाना देशिकोत्तमः ।
स्थापनान्ते तु बेरस्य बालीतं चेत्तदन्यकं ।
देशे संस्थाप्य विधिना पूजयेन्नित्यमादरात् ।
पीठस्य संध्ययोल्लिंगे बन्धनान्येन कारयेत् ।

अजिते विशेष उक्तः ।
चोरैस्संगृहीते देव शक्ते धैवादिकारिणी ।
देवे त्यक्ताहये शक्तिं वरलोहेन संघ्रेत् ।
पूर्वशक्तिप्रदनेऽप्यायोजने देवे देवि नवं ग्रास्य
प्रतिष्ठां कारयेत् । सूक्ष्मः । योगजे त्वेवमेवोक्तम् ।
कामिके तु :- मानादि द्वादशान्तान्तं तदन्तरादिनेष्वपि ।
तस्मादादाय देवेशं मूललिंगं निवेशयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मूललिंगं मलबद्धं च देशकालानुरोधितः।
षट्त्रिंशादब्दपर्यन्ते मूललिंगं निवेशयेत्।
बाललिंगं प्रतिष्ठोक्तदिन पक्षादि हेमकम्।
द्विगुणं त्रिगुणं वत्स चतुर्विंशति वत्सरे।
कृतश्चे द्विगुणं होमं आचरेद्देशिकोत्तमः।
षट्त्रिंशद्वत्सरादूर्ध्वं तु मूलस्थानं तथैव हि।
सकलं त्वेवमेवं स्यात् विशेषः कश्चिदुच्यते।
द्वादशाब्दान्तरे बाल्यो मूलस्थाने निवेशयेत्।
- - च तत्रैव संस्थाप्य मूलबेर विशेषत। इति॥
एवं सामान्येन लिंगजीर्णोद्धारमुक्त्वा स्वायंभुवादिलिंग-
विशेषाणां क्षन्तव्यांशं स्रग्धरावृत्तेन जीर्णोद्धारप्रकारं
चाह॥
लिंगं स्वायंभुवाद्यं भवति यदि - जीर्णो ना तत्र दोषो
38 L नाल्पैवोक्ता तु शान्तिर्भवति च विमलस्वर्णपद्मादि बंध
क्षन्तव्यांशं विहाय त्रिविगण सुरकृता जीर्णोद्धृति स्यात्।
- लिंगं क - - तोपक्व परभवे मानुषे लिंगपीठे।
अस्यार्थः स्वायंभुवाद्ये। लिंगं चिराच्चिरकालवशेन
जीर्णता भवति। यदि तत्र दोषो नाल्पयेव। तदुक्तं सूक्ष्मे -
स्वायंभुवादिलिंगेषु जीर्णोद्धारं न कारयेत्।
अज्ञानान्मोहितो वापि भयाद्वा रिपुणा तथा।
उत्पाटनं कृतश्चेत्तु राजराष्ट्रं विनश्यति।
अजिते -: दग्धं तत्क्षवेश्वरा वैवर्ण्यमुपलक्ष्यते।
खण्डनं स्फोटनञ्चैव स्वायंभुवनदोषदम्।
निःश्वासे -: स्वायंभुवादि लिंगानां जीर्णदोषं न कारयेत्।
इति उक्त्वा। आगमोक्त शान्तिस्तु भवति। सा यथा
कामिके -: स्वयंभुर्दैविके बाणे चार्षके गाणपे तथा।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भिन्ने वा स्फुटिते भिन्ने तत्र शान्ति द्वितीयके।
दिशाहोमं ततः कुर्यात् अष्टगन्धलेपनं कुरु।
अष्टोत्तरशतमन्त्रैः कुर्यात् क्षीराभिषेचनम्।
शान्तिहोमं पुनः कृत्वा स्नपनं कारयेत्ततः।
ब्राह्मणान् भोजयेत्पश्चात् शैवान् संभोजयेत्ततः।
महोत्सवे बलिं दद्यात् ग्रामे वा नगरेऽपि वा।
मुद्गान्नं पायसं गौलं कदलीफलसंयुतम्।
39a सप्ताहमेवं कर्तव्यं सर्वदोषापनुत्तये।
आचार्यं पूजयेन्नित्यं स्वर्णवस्त्रादिभिस्ततः।
तदन्ते स्नपनं कुर्यात् प्रभूतं च हविर्ददेत्।
सर्वाङ्गं विशीर्णं चेत् पुनस्तं स्थापयेन्नवम्।
लिङ्गे स्वायंभुवादौ तु जीर्णादौ शान्तिरीरिता।
तच्छल्यं तत्प्रदेशेषु यजेत्पूर्वं त्विह रति।
विमलस्वर्णपट्टादि खण्डस्य भवति। भिन्ने जीर्णादौ
विमलस्वर्णपट्टादिना बन्धः दार्ढ्यार्थं बन्धनं च भवति।
आदिशब्देन ताम्रादयो गृह्यन्ते। तथा निश्वासे।
तल्लिङ्गे स्फुटिते भिन्ने खण्डिते वाऽपि दूषिते।
तच्छल्यं तत्प्रदेशे तु शोधयेत्पूर्ववद्गुरुः।
स्वर्णं वा ताम्रपट्टं वा बन्धयेत्तद्दृढीकृतम्।
तत्पूर्वं स्थापयेल्लिङ्गं संप्रोक्षणमथाचरेत्।
तथा दीप्ते: स्वायंभुवादि लिङ्गानां स्फोटने चाग्निदग्धके।
लोहपट्टेन तद्बद्ध्वा पूजयेत्पूर्ववद्बुधः।
निश्वासे: नित्य प्रायश्चित्तस्वायंभुवादि जीर्णं चेत् पट्टेनैव
दृढीकृतम्। अशक्यं पट्टबद्धैस्तु बीजकांशं परित्यजेत्।
शेष मग्नौ हुत्वा तु पूर्ववत्सर्वमाचरेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एवं स्वायंभुवे दोषा भावा मुक्त्वा दैविकादीनां क्षन्तव्यांशांश्च विहाय जीर्णोद्धारः कर्तव्य इत्याह । यद्वि स्वरगण स्थापिते तु यद्वि देवगणनाम प्रतिष्ठापिते आदि शब्देन बाललिंग पौराणिकलिंग रत्नलिंग बलिपीठाख्य मन्त्रलिंगेषु तत्र लिंगे क्षन्तव्यांशा भिन्ना भिन्नादौ सत्यपि दोषांशांशं विहाय त्यक्त्वा जीर्णोद्धृतिस्तु जीर्णोद्धारः कर्तव्य इत्यर्थः॥ कामिके –:

क्षन्तव्यश्च विधिं वक्ष्ये यवान्तं लिंगमानके ।
चतुर्यवान्तं भाद्रपीठे भागान्तं पीठकल्पने ।
द्वारायंगेषु मात्रान्तं बालाग्रं ब्रह्मसूत्रके ।
तदल्पकार्ये लिंगांशे क्षन्तव्यं मानमीरितम् ।

तथा स्वायंभुवे –:

दैविके तु विशेषेण भागादि द्विमात्रान्तकम् ।
एवं हीनं गृहीतव्यं तद्दूषणं न प्रजायते ।
आर्षे तु विशेषेण अंगुलादि त्र्यंगुलम् ।
एवं हीनं गृहीतव्यं तद्दूषणं न प्रजायते ।

कारणे –: गाणपादिषु लिंगेषु भागादि दशभागकम् ।
हीनं चेत्तु गृहीतव्यं तद्दूषणं न विचारतः॥ इति॥

एवं लिंगे क्षन्तव्यांशामुक्त्वा तत् पीठेषु क्षन्तव्यांशमाह । पीठेषु स्वायंभुवादि पीठेषु अंगादिहीने सति अंगोपांग प्रत्यंगादि वैकल्ये सति । तदुक्तं निश्वासे -

स्वायंभुवादि पीठेषु भग्नो विस्फोटनेऽपि च ।
अग्निना दूषितं चैव त्यक्त्वा चान्यत्परिग्रहीत् ।

अत्र किंचिद्विशेषोऽस्ति । प्रत्यंगोपांगमंगकम् । अंगं कर्णादिदेशं तुण्डोपांगं स्वरूपमेव च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रत्यंगं चेदध्यक्ताच्च त्रिविधं तदुदाहृतम् ।
अंगेषु द्व्यंगुलं ग्राह्यं तदूर्ध्वमक्षुमं भवेत् ।
उपांगे युगांगुलं ग्राह्यमपरं वर्जयेद्बुधः ।
प्रत्यंगे द्वादशांगुल्यं अपरं वर्जये नवम् ।
जीर्णशिलयाष्टबन्धं वा तदंगं पूर्ववत्कृतम् ।
40a सर्वांगानां क्षतं दृष्ट्वा वर्जयेत्तु प्रयत्नतः ।
तच्छिलां तत्प्रमाणेन तत्पार्श्वं कारये नवम् ।
पूर्ववत्कारयेत्पीठं तस्मात्लिंगं प्रतिष्ठितम् ।
दीप्ते तु -: पीठे स्वायंभुवादीनां स्फोटने । छिन्ने भिन्नके ।
महांगमंगं प्रत्यंगं पीठलक्षं त्रिधा भवेत् ।
घृतवारि च नालं च पट्टिकां कंपमेव च ।
महांगमिति विख्यातं कंठमंगं प्रकीर्तितम् ।
वाजिनं कैरवश्चैव जगदीपात्रकं तथा ।
प्रत्यंगमिति विख्यातं विशेषं त्वधुना शृणु ।
महांगे एकांगुलं ग्राह्यमंगे तु द्विगुणं भवेत् ।
प्रत्यंगे द्विगुणं ग्राह्यं तत्प्रमाणाधिकं त्यजेत् ।
एवं स्वायंभुवादीनामार्षान्तं च प्रकल्पयेत् ।

ननु उक्तानेकागमवचनैः स्वायंभुवादिलिंगानां जीर्णोद्धारविधिः स्वानिबन्धः दृश्यते । तत्कथं अत्र समाधानमिति चेत् सत्यम् । स्वायंभुवादिलिंगेषु जीर्णोद्धारनिबन्धवचनानां स्वायंभुवलिंगमात्र एव मुख्यार्थत्वं दैविकगाणपार्षवाणलिंगेषु तस्मात्तदपरादुपचरितार्थत्वमेव । अन्यथा तेषां क्षन्तव्यांशवचनैरनर्थत्वं स्यात् । इदानीं मानुषलिंगपीठादौ विशेषमाह नयवपरं इति । मानुष्ये मनुष्यप्रतिष्ठापिते लिंगपीठे । लिंगपीठविषये

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

त्र्यम्बकमुखपरं तथा त्र्यम्बकम् आदिर्येषां ते त्र्यम्बकमुखाः
तेभ्यपरं तेभ्योऽधिकं भिन्नाभिन्नादौ सति विशेषः।
जीर्णे इति अस्यापि दत्तत्रापि संबन्धः। अतः लिङ्गे मानुषे
त्रियवाधिकं पीठे त्र्यङ्गुलाधिकमित्यर्थः। तथाचोक्तं
५०६ दीप्तागमे -: मानुषे लिङ्गजीर्णं च त्रियवाद्यधिकं त्यजेत्।
मानुषे पीठजीर्णं चेत् पूर्ववत्स्फोटनादिभिः।
महाङ्गे द्व्यङ्गुलं ग्राह्यं मङ्गे तु द्विगुणीकृतम्।
अयस्तालाङ्गुलं ग्राह्यं तदूर्ध्वं परिवर्जयेत्।
पूर्वमानेन संग्राह्य स्थापयेत्पूर्ववद्बुध इति।
अयांकुश-तन्त्रे च -:
एकत्रियवाधिक्ये सहसा त्यज्य दोषिकः।
एकद्वित्र्यङ्गुलाधिक्ये स्फोटने जीर्णकेऽपि च।
मानुषे लिङ्गपिण्डी चेत् तत्र दोषो न विद्यत इति।
मानुषलिङ्गपीठयोः तत्तदङ्गे जीर्णविषये अन्यतरजीर्णे
तदन्यतरं परिग्राह्यम्। तथोक्तं दीप्ते -:
मानुषे लिङ्गजीर्णे च वर्जयेत्पीठमाहरेत्।
मानुषे पीठजीर्णे तु वर्जयेत्पीठसंग्रहेत्।
वीरतन्त्रे च -: लिङ्गं न दोषं यदि भिन्नपीठं
पीठं त्यजेत्पूर्ववदेव कुर्यात्।
पीठं न दोषं यदि भिन्न लिङ्ग-
माधारशैलादपि वर्जनीयम्॥
निश्वासे -: मानुषे लिङ्गपीठे चेत् दग्धे चेत्स्फोटनादिके।
अयाङ्गुलस्य याल्लिङ्गं तदूर्ध्वं वर्जयेन्नवम्।
पीठे चेत्त्र्यङ्गुलं हीनं त्वपरं वर्जये नवम्।
पूर्वलिङ्गं च पीठं च स्थापयेत्सर्वालीढदम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विपरीतमनर्थाय भवेत्सत्यं न संशयः।

तथा च कारणे —

मानुषादिषु लिङ्गेषु पीठभेदमथाचरेत्।

41a दृष्ट्वा पीठक्षयं लिङ्गं कृत्वा पीठं पुरातनवत्।

यथा लिङ्गं तथा पीठं योजयेत्तु विचक्षणः।

दृष्ट्वा लिङ्गं क्षयं पीठं तत्क्रमेणैव बुद्धिमान्। इति।

अत्र गर्षिगणस्वराकृताद्य इत्यत्राद्यशब्दोक्तबाणलिङ्गादीनां पञ्चानामपि तत्तदागमवचनैरेव क्रियाकलापः प्रदर्श्यते।

तत्र पदार्थस्य बाणलिङ्गं यथा दीप्ते —

बाणलिङ्गस्य जीर्णे तु मात्राधिकं परित्यजेत्।

बाणलिङ्गस्य पीठे तु रूपत्रयाधिकं त्यजेत्।

लिङ्गं संग्राह्य मतिमान् लोहपीठे प्रतिष्ठितम्।

विधिना बन्धनं कृत्वा पूजयेच्छिवमादरात्।

सूक्ष्मे तु — बाणलिङ्गस्य जीर्णत्वे त्वङ्कुरादधिकं यथा।

उद्धारक्रममार्गेण समुद्रे निक्षिपेद्बुधः।

अन्यद्बाणलिङ्गं वा स्थापयेद्विधिना बुधः।

कामिके — जीर्णादिदोषदुष्टं च विधिनापि न चालयेत्।

सुदृढं स्वर्णपट्टाद्यैः कृत्वा शान्तिं समाचरेत्।

आत्मार्थं लिङ्गजीर्णोद्धारं चेत्तद्विधानं स्वायम्भुवे —
प्रतिपादितम्॥ तद्यथा —

अथवान्यप्रकारेण अर्च्यादिषु कथ्यते।

बाणलिङ्गादिलिङ्गेषु पीठे छिन्ने तथैव च।

आत्मन्युद्वास्य विधिवत् कुम्भादौ वा यथाविधि।

सकलानि परित्यज्य यथा स्वर्णेन कारयेत्।

रजतेनाथ ताम्रेण शिलया दारुणाथवा।

यथापूर्वं तु संस्थाप्य यथा पूर्वं नियोजयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

41.6 अष्टबन्धे वितीर्णे तु बाणलिंगे विशेषतः।
स्वर्णेन रजतेनैव अष्टबन्धं तु कारयेत्।
कुंभादौ पूर्ववद्योज्य कर्मान्ते योजयेच्छिवम्।
स्नपनं शान्तिहोमश्च प्रायश्चित्तास्त्रजपकम्।
प्रभूतहविषं चैव कृत्वा सन्तोषयेच्छिवम्।

बाललिंगस्य यथा सुप्रभेदे -:
तरुणालयहीनं चेत् कृत्वा तत्पूर्ववद्बुधः।
बाललिंगं च पीठं वा भिन्नं भिन्नादिसंश्रिते।
तल्लिंगन्तु जले त्यक्त्वा लिंगं संपाद्यपूर्ववत्।

स्वायंभुवे -: मूलालयप्रवेशादौ दारुलिंगस्य दाहयेत्।
अथवा सर्व सर्वं तु स्थलेवाथ जलेपि वा।

सुप्रभेदे -: तरुणलिंगं समुत्थाप्य शैलं लोहं जले क्षिपेत्।
दारुजं चाग्निनादग्ध्वा अथवात्तु विनिक्षिपेत्।

रौरवे। कारणे -: तरुणालयं विसृज्याथ दारुमग्नौ विनिक्षिपेत्।
शैलजं तरुणं लिंगं समुद्रे तु विनिक्षिपेत्।
तद्बाललिंगं संगृह्य संस्थाप्यं मूललिंगके।
सततं कालशाठ्ये च ग्रामं नश्यत्यसंशय।
तस्मात्सर्वप्रयत्नेन बाललिंगं विवर्जयेत्।

कारणे -: जीर्णिते बाललिंगे तु उद्धारणमथाचरेत्।
तत्पाग्रे स्थण्डिलं कृत्वा निर्दोषैः सिकताल्पितैः।
अग्न्याधानादिकं सर्वं पूर्वोक्तविधिना नयेत्।
सान्निध्यासनमन्त्रेण मूलमीशानमन्त्रतः।
हृदयेन शरं हुत्वा पेयामीशाति लालकम्।
शितछजं नेत्रमन्त्रेण बिल्वपत्रं तु वर्मणा।
अघोरास्त्रशतं हुत्वा प्रत्येकं तु विशेषतः।
शान्त्यन्ते व्याहृतिं हुत्वा जयादीन् जुहुयात्ततः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

42a पूर्णाहुतिं ततः कृत्वा शिरोमन्त्रेण देशिकः।
सद्यलिंगं प्रकुर्वीत पूर्वोक्तेनैव कर्मणा।
पौराणिकलिंगस्य यथा सूक्ष्मे —
पौराणिकस्य लिंगस्य यवमानक्षये यदि।
संप्रोक्षणं ततः कुर्यात्स्नानाहेतेन कर्मणा।
सुप्रभेदे — तरुणं लिंगमुत्थाप्य शैललोहं जले क्षिपेत्।
दारुजं त्वग्निना दग्ध्वा अथवाप्सु विनिक्षिपेत्।
येन केन प्रकारेण न निर्दिष्टं तु निश्चितम्।
ज्ञातपौराणिकं लिंगं पारम्पर्येण नामकृत्।
तस्य लिंगस्य जीर्णे तु खण्डस्फोटादिके सति।
तस्यैव पुरतस्सम्यक् मिश्रलिंगं प्रतिष्ठयेत्।
यवान्तरप्रमाणेन हीनस्यापि न दोषभाक्।
तस्मादधिकहीनश्चेत् स्वर्णेन रजतेन वा।
ताम्रपट्टेन वा कुर्यात् अंगलंपूरणं बुधः।
पुनस्थापनमार्गेण कारयेद्विधिपूर्वकम्।
स्कन्दप्रयुक्तं लिंगं पुराणान्तं निवेश्यते।
अष्टादशपुराणेषु लिंगं पौराणमार्गतः।
मूलशास्त्रविधानेन कुर्यात्पौराणिके विधौ।
चलितलिंगस्य यथा सुप्रभेदे —
बलिभ्रमणकाले तु लिङ्गं पतनमेव चेत्।
स्फुटितं चलितं भिन्नं भग्नं छिन्नं भिन्नन्तु सम्भवेत्।
तत्रैव कारयेद्धोममथवालयमध्यमे।
पूर्ववद्बलिलिंगन्तु कृत्वा तत्र प्रदक्षिणम्।
अथवा पूर्ववत्कृत्वा भ्रमणं तु हुतं क्रमात्।
42b मूलमन्त्रं जपेत्तत्र शतमष्टोत्तरं बुधः।
अगम्यमतिगम्यं वा मूलमन्त्रं शतं जपेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रत्नलिंगस्य यथा अजिते –

रत्नजेऽन्यत् लिंगेषु खण्डादौ समुपस्थिते ।
तदेवान्येन मानेन कृतहस्तेन शिल्पिना ।
कारयेच्छाङ्कजे लिङ्गे खण्डस्फोटादि संभवे ।
तस्मान्मानेन परं लिंगं तेन द्रव्येण कारयेत् ।
अनुयोज्यात्र कुर्वीत होमं ब्राह्मणभोजनम् ॥ इति ॥

भद्रलिंगपीठे यथा सुप्रभेदे –

बलिपीठविधाने तु स्थापयेद्बलिपीठकम् ।

निश्वासे – बलिपीठस्य भेदे तु त्यक्त्वा चान्यपरिग्रहात् ।
पीठस्य शकले जीर्णे तत्प्रदेशं समुद्धरेत् ।
पुनस्संस्थानकं कृत्वा पूर्ववत्स्थापयेद्बुधः ।

स्वायंभुवे – पीठाग्रं वापि वाग्रं वा मध्यं वा मानमाचरेत् ।
यथेष्टदेशं कर्तव्यं मानोत्कृष्टमथाचरेत् ।
बाह्यपीठं समादाय चान्तःकार्यं च कारयेत् ।
न्यूनमानं न कर्तव्यमधिकं शुभदं भवेत् ।
तस्मात्सर्वप्रयत्नेन अन्तर्बाह्यं न कारयेत् ।
यदि मोहेन कुरुते कर्ता तत्र विनश्यति ।

सूक्ष्मे – जीर्णपीठपरित्यागं कृत्वान्यं स्थापयेन्नवम् ।
तज्जीर्णं तु त्रिधा प्रोक्तं स्फुटितं जीर्णभिन्नकम् ।
भद्रपीठविशेषेण महांगोपांगसंयुतम् ।
उपांगजगती वापि कुमुदं कण्ठपट्टिका ।
पद्मं च कर्णिकाबाधमहांगमिति कीर्तितम् ।

43a दलोपदलनालाद्युपांगमिति कीर्तितम् ।
वर्जयेत्तानि हांगेषु न त्याज्यं चेत्प्रभंजनं ।
दण्डपीठादिसर्वेषु विभिन्नेतांश्च वर्जयेत् ।
तस्योद्धारक्रमं वक्ष्ये पीठरक्षणमण्डले ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

संकल्पयाचनमावाह्य पूजामग्रसमारभेत् ।
तत्पूर्वं स्थण्डिलं कृत्वा शालिभिर्विमलैः शुभैः ।
तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् ।
द्रोणाम्बुपूरितघटं तन्मध्ये विन्यसेद् बुधः ॥
आवाह्य पीठे देवांश्च कुंभमध्ये तु विन्यसेत् ।
निवेद्यादीन् समाप्याथ याग(?)कार्योक्तमार्गतः ।
आधानादिविवाहान्तं कृत्वा मधुघृतैरपि ।
दूर्वाभिस्तण्डुलैस्तत्र देवतामन्त्रमुच्चरन् ।
शतमर्धं तदर्धं वा होमयेत्तु पृथक् पृथक् ।
हृदयादि बीजमुख्येन पूर्णाहुतिमथाचरेत् ।
जयादिरभ्याधानञ्च क्रमशश्च हुतं हुनेत् ।
अग्निस्थं मण्डलस्थं च कुंभमध्ये समावहेत् ।
भूतलं निखनेत्तानि समुद्रे वाथवा नयेत् ।
जीर्णपीठादिसंभूतमालिप्य चैव(?) समाचरेत् ।
पीठशुद्धिं ततः कृत्वा पञ्चक्षुण्णं विलेपकैः ।
भद्रपीठे विशेषोक्ते तदग्रात्स्थितदर्पणे ।
धाराभिषेचनं कुर्यात् चक्षुर्दोषक्षेति मन्त्रतः ।
वास्तुहोमबलिं चाथ मण्डपायां समाचरेत् ।
रक्षाबन्धं ततः कुर्यात् भद्रपीठस्य कर्णिके ।
अन्येषामपि पीठानामथवा तद्विधिना चरेत् ।

कामिके ध्वजदण्डजीर्णोद्धारः ॥

436 द्वादशाब्दावसानान्ते ध्वजालंध्यानमेव च ।
जीर्णादिदोषे तं त्यक्त्वा ध्वजमन्यं निवेशयेत् ।

॥ इति जीर्णोद्धारे द्वितीयपरिच्छेदः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

॥ प्रतिमाजीर्णोद्धारः ॥

अथैवं लिङ्गजीर्णोद्धारप्रकारमुक्त्वा प्रतिमाजीर्णोद्धारं शार्दूलविक्रीडितवृत्तेनाह -

शैलं लोहजमृज्जदारुजमिति स्थाप्यं च चित्रादिकं बेरं जीर्णविभिन्नदग्धमुदितं दोषावहं पूजने।

अंगादिष्वपि दृष्टता यदि भवेत्तद्रूप तन्मानतः स्तच्छ्रेष्ठं न तु आगमोक्तविधिना कुर्याच्छुभप्राप्तये॥

बेरं प्रतिमा। अत्र बेरशब्देन मुखालनादिशिवप्रतिमा भेदा गौरि प्रतिमा भेदा विष्ण्वादि मुनिपर्यन्तानां सकल प्रतिमादयोऽपि गृह्यन्ते। तदुक्तं कारणे -

विष्णुब्रह्मेन्द्रादीनां सूर्यसोम - नलादिनाम्।
गौरि दुर्गा महाभूति श्री वाग्देव्यादिनामपि।
गणेशान्मुनिपर्यन्तं समुन्नेयं समन्ततः।

तच्च बेरं शिलादिना भेदेन बहुविधमित्याह। शैलं शिलामयं लोहजं स्वर्णादि निर्मितं मृज्जं मृत्तिका सम्पादितम्। दारुजं लिंगाद्युं पूर्वोक्तवृक्षादिसाधितमिति स्थाप्यम्। प्रतिष्ठं चित्रादिकञ्च। अत्रादिशब्देन आभासेष्टका रत्नादिकं लिङ्गान्तकोक्तश्चैते ग्राह्यन्ते। तच्जीर्णं विभिन्नं दग्धं वा भवति चेत्। पूजने दोषानावहति करोतीति दोषावहमुदितमुक्तम्। तदुक्तं तथा चोक्तं सूक्ष्मे -

मृण्मयं दारुजं वापि लोहजं वा शिलामयम्।
स्थापितं पूजितं बेरं जीर्णं वा भिन्नमेव वा।
छिन्नं वाऽथाग्नि दग्धं वा दृष्ट्वा बेरं न पूजयेत्।
पूजयेद्यदि मोहेन राजराष्ट्रं विनश्यति।

अंगादिषु लिंगोपांग प्रत्यंगेषु जीर्णताजीर्णादि दोषयुक्तता -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भवेद्यदि तद्द्रव्यं तन्मानतः मद्द्रव्येण पूर्वबेरं तद्द्रव्येण यन्मानेन पूर्वबेरं तन्मानेन च तदूर्ध्वेनाप्पूर्वद्रव्यापेक्षया उत्तमद्रव्येण वा तथा चोक्तम्। दीप्ते :

शिलाबेरस्य जीर्णे तु अंगोपांगे विवर्जयेत्।
प्रत्यंगे जीर्णिते कुर्यात् ग्राह्यं तत्प्रवचनतः॥

निश्वासे : बेरादीनाञ्च सर्वेषां अंगोपांगे विभाजनम्।
अंगेषु जीर्णितं वर्ज्यं ... गं संग्रहे ततः॥

अंगोपांगप्रत्यंगानां स्वरूपम्। कारणे प्रतिपादितम्। तद्यथा : अंगं प्रत्यंगं सांगं च उपांगं च चतुर्विधम्।

शिरो वक्त्रञ्च हृदयं अंगं चेति प्रकीर्तितम्।
वक्षः कण्ठस्तनौ बाहू नाभिगुह्योदरं तथा।
ऊरुजानुद्वयं चैव प्रत्यंगमिति कीर्तितम्।
नेत्रं नासाग्रकर्णञ्च पाणिपादतलांगुली।
जटामकुटसंयुक्तं सांगं चेति प्रकीर्तितम्।
५५८ यज्ञोपवीतमाला च आयुधाभरणं तथा।
गंगा च प्रभवस्मारं नागं कूर्मं तथैव च।
प्रभाहीनसमायुक्तं पद्मबन्धं तथैव च।
आसनाभरणञ्चैव उपांगमेव कीर्तितम्।
उपांग प्रकोष्ठ बाहू च अंगुल्यं कण्ठ उच्यते।
भूषणं चोपवीतं च वस्त्रस्त्रगादिरुच्यते।
प्रत्यंगमिति सर्वेषां भिन्ने भिन्ने च संभवेत्।
सर्वलक्षणसम्पन्नं तन्मात्रं योजयेत्ततः॥

रहस्यार्थे : कथ्यते। क्वचित्पुनः सन्धानमाचरेत्।
पञ्चगव्येन संप्रोक्ष्य जलेन स्नानमाचरेत्।
बेरशुद्धिं ततः कुर्यात् प्रतिष्ठा विधिपूर्वकम्।
सर्वलोकस्य शान्त्यर्थं शान्तिकर्म समाचरेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रत्यंगस्य विधिः प्रोक्तः उपांगस्य ततः शृणु।
यथा समस्तजीर्णं तु पूर्वभागं कुर्याजवत्।
पुण्याहं वाचयेत्तत्र प्रतिष्ठा विधिपूर्वकम्।
रक्षिस्नानं ततः कुर्यात् शान्तिकुंभं समाचरेत्।
अंगविधिवत्प्रोक्तं अंगहीनं ततः शृणु।
खण्डनं छेदनं वापि स्फुटितं जीर्णसंभवम्।
जीर्णबेरं समुद्धृत्य वह्नौर्णैव नयेद्बुधः। (छिन्नेपि)
पूर्वलक्षणसंग्राह्य विधिवत् बिंबमिलप्।
पूर्ववल्लक्षणं ग्राह्यं हीनाधिक्यं च वर्जयेत्।
सर्वावयवसम्पूर्णं स्वर्णं प्रतिबिम्बवत्।
अंगोपांगप्रत्यंगान्तन्भेदं कल्पयेन्नवम्।
५५० पुण्याहं वाचयेद्धीमान् कुर्याच्छिल्पि विसर्जनम्।
पञ्चगव्येन संप्रोक्ष्य जलाधिवासनं परम्।
प्रतिष्ठां विधिवत्कुर्यात्त्रिवारं शान्तिहोमकम्।
वातुले: अग्न्यादि दग्धं यद्बिम्बं तद्बिम्बे दूषिते सति।
नृपस्य मरणं शीघ्रं व्रणरोगेण सम्भवेत्।
नवमन्यत्परिग्राह्यं पूर्वोक्तैर्लक्षणैर्युतम्।
संप्रोक्षणं ततः कुर्यात् शान्तिहोमं तु कारयेत्।
अग्निना स्फुटिते छिन्ने प्रत्यंगोपांगहीनके।
मासमासद्वयञ्चैव तासमासत्रयं तथा।
यदंगं दृष्टवत्कृत्वा पूजाकार्यं न दोषभाक्।
सधेन शान्तकुंभन्तु कृष्णालेन समाचरेत्।
अथवा लोहजे बिम्बे पूर्ववत्परिकल्पयेत्।
लोहजानां तु लिंगानां विशेषः कथ्यते हि।
कर्णोदर शिरो वक्षो बाहु कूर्पर पाणयः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कटिजङ्घे महांगानि जीर्णां चैव तु कारयेत् ।
शत्रुराष्ट्रस्य नाशश्च भूपतिस्त्वरयात्रा भवेत् ।
जीर्णबेरं तु यो जित्वा तद्बेरं कुंभमावाहयेत् ।
तद्रूपं तत्प्रमाणेन तद्बिम्बं पूर्ववत् भवेत् ।
संप्रोक्षणं ततः कृत्वा प्रतिष्ठा कारयेत्ततः ।
अंगहीने तु यत्प्रोक्तं क्षुद्भयं ग्रामवासिनाम् ।
बेराग्रे नालिकाग्रे च तालु चैव तु कारयेत् ।
45b कण्ठे चांगुलिमंगानि पुनस्सन्धानमाचरेत् ।
संप्रोक्षणं ततः कृत्वा त्रिवारं विनाचरेत् ।
अधिवासनादि यत्सर्वं स्वयः कर्मसमाचरेत् ।
केशलोमनखादीनि जटामूलेन्दुशेखरम् ।
क्लेशो भूषणं त्येतत् उपांगं चैव हीनके ।
तद्ग्राम नृपतेर्देहे दुःखशोकभयावहम् ।
पूर्वसन्धानकं कृत्वा संप्रोक्षणमथाचरेत् ।
पादुकावाहनादीनि लेपनं नखवाहनम् ।
नागं च दुर्वपस्मारमकुटं भूषणाम्बरैः ।
छिन्नं वीरं च शंखञ्च हरिणं टङ्कशूलकम् ।
कल्हारमक्षमाला च पाशपमायुधान्यपि ।
पीठं प्रभाञ्च छत्रञ्च प्रत्यंगञ्च विहीनके ।
राजावाहनहीनश्च चतुरंगविहीनकः ।
विशेषालंकृतिनाश्च नाशो भवति ध्रुवम् ।
पुनस्सन्धानकं कृत्वा संप्रोक्षणमथाचरेत् ।
अंशुमती :- उत्तमांगविहीने च भूषणालि विहीनके ।
उत्तमांगविहीने तु बलिबिम्बं प्रकल्पयेत् ।
बेरांगहीने भिन्ने वा बेरमार्गं परित्यजेत् ।
पीठांगहीने भिन्ने वा पीठमार्गं परित्यजेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कामिके :- बेरे शिलामये मध्ये पेक्षो वक्षोऽपि रत्नजे ।
वक्षाभूपा स्वरेखादिहीने तु परिवर्जयेत् ।
अंगहीने तु सत्याज्यमित्यत्र न विचारणा ।
लोहजे मृण्मये बेरे हस्तनासा च अंघ्रिभूषणे ।
कर्णदन्तादिहीने तु तत्तद्द्रव्यैर्दृढं नयेत् ।
46a उत्तमांगविहीने तु त्यक्त्वान्यं योजयेन्नवम् ।
स्कन्धाहुहीने त्याज्यं वा सन्धानं वा समाचरेत् ॥
काश्यपे :- बालकादिषु विच्छिन्ने पादयोर्हस्तयोस्तु वा ।
तेनैव जीर्णलोहेन पूर्ववद्बिम्बमाचरेत् ।
अष्टत्रिंशत्तु तल्लोहं स्रावित्वा भूमौ विशेषतः ।
पश्चादग्नौ मृदं कृत्वा पुनर्बिम्बं समाचरेत् ।
कारणे :- ब्रह्मरेखा वक्षरेखा च आस्यरेखा च नासिका ।
एवमंगं क्षयं दृष्ट्वा प्रतिमां परिवर्जयेत् ।
महांगोपांगप्रत्यंगं क्षयं दृष्ट्वा विशेषतः ।
अंगहीने प्रकर्तव्यं त्यक्त्वा बिम्बं प्रयत्नतः ।
उपांगहीने कर्तव्यं पुनस्सन्धानमाचरेत् ।
प्रत्यंगादिसमायुक्तमेवमेव क्रमेण तु ।
शिलादारुमयं चैव मृण्मयं चैव वर्जयेत् ।
शिलाग्रहणपूर्वेण बिम्बानां पूर्ववन्नयेत् ।
लोहजं चोद्धृतेन तद्द्रव्यं तत्प्रमाणतः ।
मानोत्कृष्टं प्रकर्तव्यं मानहीनं न विद्यते ।
अजिते :- लोहजानां तु बेराणां शिरोहीनं तु यद्भवेत् ।
अग्नौ हुतं तु लोहं यत्परिशुद्धमिति स्मृतम् ।
तेन लोहेन तद्रूपं अन्यैर्वापि प्रकल्पयेत् ।
अंगोपांगादिवैकल्ये सान्धियोग्यं तु यद्भवेत् ।
सन्धिं तत्र प्रयुञ्जीत ततः प्रोक्षणमाचरेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अर्वाग्दशाहतः कर्तुमुद्धृतं वाप्यनुद्धृतम् ।
शक्यते तत्र तद्दैवं कुंभं विन्यस्य कारयेत् ।
46b तस्मादूर्ध्वं तथा पीठं समवाप्य प्रकल्पयेत् ।
इति भूगत बिम्बं चेच्छुद्धिं कृत्वा रत्नन्यासादिरहितं
प्रतिष्ठां कुर्याच्छेतच्छेदादूर्ध्वं भूगतबिम्बं पूजाहीनादि-
बिम्बस्य प्रतिष्ठां कुर्यात् ॥ कारणे –:
भूगर्तादुद्धृतं बिम्बं शैलजं लोहजं तु वा ।
समुद्धरेत्तु तद्बिम्बं शोधयित्वा तु संग्रहेत् ।
दक्षिणात्क्षीर धाराभिरभिषिच्याथ वारिभिः ।
चोरशुद्धिं ततः कृत्वा प्रतिष्ठां सम्यगाचरेत् ।
रत्नन्यासाक्षिमोक्षस्य जलाधिवासनं विना ।
पुनः प्रतिष्ठां कुर्वीत पूर्वस्थाने निवेशयेत् ।
शता · · · गतं चेत्तु पूजा हीनो न वाथवा ।
गृहान्वितं चांगहीनं सर्वं पूजाविहीनकम् ।
तद्बिम्बमुद्धृतं चाशु देवबिम्बान्तरं व्रजेत् ।
तस्मात्सर्वप्रयत्नेन प्रतिष्ठां कारयेद्बुधः ।
आकारशोधनं कृत्वा जीर्णोद्धारविधिं चरेत् ।
पश्चाद्बिम्बविशुद्ध्यर्थं पालाशैर्बिल्वपत्रकैः ।
अघोरमन्त्रपूतेन दहेद्बिम्बं शिवाग्निना ।
शिल्पिना कारयित्वा तु प्रकाशमतिसुन्दरम् ।
पश्चात्प्रतिष्ठां कुर्वीत बिम्बसंकरदोषहृत् ।
पूर्वस्थानयुतं चेत्तु पूर्वस्थाने निवेशयेत् ।
पूर्वालयविहीनं चेन्नवेदन्यालये इदम् ।
47a स्थापयेत्तु विशेषेण प्रतिष्ठां कारयेद्बुधः ।
उत्सवं कारयेत्तत्र नित्यनैमित्तिकादिकम् ।
शतान्तेऽनन्तरे काले विशेषप्रतिष्ठां तथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आगते सति विप्रेन्द्र वत्सर प्रथमद्वयमे ।
पूर्वेशस्योत्सवं नेष्टं प्रशस्तं नित्यपूजनम् ।
सम्प्राप्ते तस्य नित्यादि प्रत्यब्दं चोत्सवं नयेत् ।
ततस्त्रिवत्सरादूर्ध्वं पूर्वेशस्योत्सवं मतम् ।
यजमानेच्छया धीमान् सर्वदापि विचक्षणः ।

चित्रबेरस्य यथा अंशुमते --:

चित्रबेरांगविच्छिन्ने पुनस्सन्धानमाचरेत् ।
कर्णच्छेदे यथा रज्जु छेदने कल्पमिन्तके ।
वर्णवज्रानुहीने च पूर्वद्रव्येण कारयेत् ।
प्रधानांगविहीने तु सहसा त्यजेत् देशिकः ।
चित्रदारुमयं शैललोहजं रत्नजं तु वा ।
स्थापितं यदि तद्बेरं पूजितं जीर्णमेव वा ।
छिन्नं वाप्यथ भग्नं वा दग्धं वातं परित्यजेत् ।
कुड्यचित्रस्य जीर्णे तु स्थापितं वर्णहीनकम् ।
वर्णहीने शिलाजीर्णे लोहजं स्थापयेद्बुधः ।
लोहबेरस्य जीर्णे तु रत्नजं स्थाप्य पूजयेत् ।
रत्नबेरस्य जीर्णे तु रत्नमेव प्रकल्पयेत् ।
एवं क्रमेण संस्थाप्य पूजयेद्विधिवत्सम ...
पूर्वद्रव्येण वा कुर्यात्पूर्वाकृतिर्यथा तथा ।
द्रव्योत्कृष्टेन वा कुर्यात्पूर्वमानेन देशिकः ।
इष्टकाया वरं कुड्यं चित्रमाभासवर्जितम् ।
आभासादिष्टका गर्भं चित्रमेव चित्रमेव विशिष्यते ।
476 इष्टका गर्भाच्चित्रात्तु दारुगर्भं विशिष्यते ।
दारुगर्भाच्छिलागर्भं वर्णलेपं विशिष्यते ।
वर्णलेपाच्छिलागर्भात्केवलाश्मा विशिष्यते ।
अश्मनो लोहजं श्रेष्ठं लोहाद्रत्नं विशिष्यते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रत्ने रत्नं प्रकर्तव्यं अपरं तु न कारयेत् ।

बेरपीठजीर्णोद्धार उच्यते । यथा अंशुमति :

जीर्णबेरासनं गृह्य गर्भश्वभ्राबलान्वितम् ।
आबलश्वभ्रयुक्तं चेत् बलद्रव्येण कारयेत् ।
इष्टकागर्भपीठोर्ध्वे दारुगर्भं प्रतिष्ठितम् ।
दारुगर्भासनं स्थाप्यं शिलागर्भं यथा दृढम् ।
शिलागर्भस्य पीठोर्ध्वे स्थाप्यं बेरं तु शैलकम् ।
लोहबेरं शिलापीठे स्थापयेन्न कदाचन ।
लोहजे लोहरत्नजं बेरं स्थापयेत्तु विचक्षणः ।
रत्नजे लोहपीठे वा रत्नजं वापि कारयेत् ।

अथ शूलोद्धार उच्यते । कारणे :

गर्भे च पतिते चैव चलिते चाङ्गहीनके ।
अग्निना वर्णहीने च कर्मच्छेदे तथैव च ।
पीठबन्धविहीने च ग्रामनाशं विनिर्दिशेत् ।
पतिते ज्वलिते चैव बालस्थानं तु कारयेत् ।
शूलान्तु स्थापयेत्पश्चात्पूर्वोक्तविधिना ततः ।
बेरन्तु विधिवत्कृत्वा संप्रोक्षणमथाचरेत् ।
अंगोपांगञ्च प्रत्यंगं शूलं त्रिविधमुच्यते ।
अंगप्रधानशूलस्यात् ब्रह्मदण्डं तथोच्यते ।
वक्षोदण्डकटीदण्डबाहुकूर्परदण्डकम् ।
48a ऊरुश्च जानुजंघे च उपांगमिति कीर्तितम् ।
शेषाणान्तु विजानीयात् प्रत्यंगमिति बुद्धिमान् ।
ब्रह्मदण्डविहीनं चेत् शूलस्थापनमाचरेत् ।
प्रत्यंगोपांगहीने च पुनर्बालस्थानकं कुरु ।

कामिके : पूर्ववत् स्थापितो ब्रह्मदण्डश्चेल्लक्षणान्वितम् ।
तमेव स्थापयेत्तत्र पुनरापादनं विना ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भंगादीनां समुत्पन्नौ पुनस्संस्थापनं नयेत्॥ इति।
सिद्धान्तशेखरे जीर्णोद्धारविधिर्यथा। कामिके -

जीर्णांगमां सिद्धान्तपुस्तकं तद्धृतद्रुतम्।
अग्निकुण्डे तु होतव्यं हुत्वाघोरशतं जपेत्॥ इति।

एवं प्रतिमादीनां शिल्पिकृत्यमुक्त्वा प्रतिविधिमाह।
आगमोक्तविधिना। आगमोक्तक्रियाकलापमार्गेण कुर्यात्।
तद्यथाप्रकारः। अजिते -:

तत्र पूर्वं देवाग्रे स्थण्डिले विधिवत्कृते।
स्थाप्य कुंभमथो रम्यं सितसूत्रावेष्टितम्।
गन्धोदपूरितं स्वर्णं कूर्चयुक्तं च वाससा।
वेष्टितं सपिधानं च तदग्रे स्थण्डिले कृते।
सैकते विधिवत्कृत्वा यागहोममनन्तरम्।
ततः कुंभे समावाह्य देवमूलमनुस्मरन्।
गन्धपुष्पादिभिस्सम्यगर्चयित्वा विधानतः।
स्वगृहेऽन्यत्र देशे तु कुंभं संस्थापयेत्सुधीः।
पीठं चेदत्र पीठे तु कुंभे मन्त्रं तु पूर्ववत्।
विन्यस्य तत्र देवस्य पूजां प्रत्यहमाचरेत्।
प्रवेशेऽपि पुरा कृत्वा यागहोमं विधानतः।
48-6 कुंभपार्श्वे समुद्धृत्य कृत्वा ग्रामप्रदक्षिणम्।
अन्तः प्रविश्य देवाग्रे स्थण्डिले विधिवत्कृते।
स्थाप्य पूर्ववत्पूर्वन्तु तत्र देवं समर्चयेत्।
ततः कुंभार्पितं नैव मन्त्रेण प्रतिमाहृदि।
विन्यस्य मन्त्ररूपं तु देवमंगैस्समायुतम्।
तस्याग्रे शान्तिहोमं तु ततः कुर्यादतन्द्रितः।
पीठं चेत्तत्समीपे तु स्थण्डिले विधिवत्कृते।
स्थाप्य कुंभं यथापूर्वं पीठे त्वभ्यर्च्य देवताम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यात्राहोमं ततः कृत्वा पीठादावाहयेत्ततः ।
कुंभे संगन्तु तद्देव कुंभमुद्धृत्य विन्यसेत् ।
वेद्यां संप्रोक्षणार्थाय निर्मिते मण्डपे शुभे ।
पीठस्य प्रतिपेत्तोये प्रोक्षणं कारयेत्ततः ।
अह्यं च सकलप्रोक्षणविधिः । कारणे प्रतिपादितः ।
पूर्वपक्षे तु पुण्यर्क्षे यजमानानुकूलके ।
अंकुरानर्पयेत्पूर्वं प्रोक्षणादिविशेषतः ।
प्रासादस्याग्र(ले) वापि याम्ये वापाके यवा ।
ईशान्यां पश्चिमे वापि मण्डपन्तु युगाग्निकम् ।
नवहस्तयस्य हस्तं वा उत्तमं मध्यमाधमम् ।
षोडशास्तंभसंयुक्तं युगद्वारसमन्वितम् ।
पूर्वोक्तलक्षणैर्युक्तं चतुस्तोरणभूषितम् ।
मण्डपे नवभागेन मध्यवेदिं प्रकल्पयेत् ।
49a अरत्निमात्रकोत्सेधाय षोडशांगुलमेव च ।
गोमयालेपनं कृत्वा दर्पणोदरसन्निभम् ।
कुण्डानि परितः कुर्या मानुके तु यदेक्रमात् ।
नवाग्निं वाथ पञ्चाग्निमेकाग्निं वा विशेषतः ।
दिशासु चतुरश्राणि विदिशास्वब्जकुण्डजा ।
शाक्रशांकरयोर्मध्ये वृत्तं प्रधानकं कुरु ।
पञ्चायतनं चेत्तु अब्जकुण्डं विवर्जयेत् ।
प्रत्येकं व्याहृतिं हुत्वा जयं तत्रैव योजयेत् ,
पूर्णाहुतिं ततो हुत्वा मूर्तिमन्त्रेण भूयतं ।
जयादिरभ्याधानञ्च राष्ट्रभृच्च क्रमाद्धुनेत् ।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ।
वास्तुहोमं ततः कुर्यात् समरोधि पदेषु च ।
गन्धपुष्पञ्च धूपञ्च दीपमर्घ्यं प्रदापयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वेदिमध्ये तथोद्धृत्य स्नानवेद्यां निवेशयेत् ।
सद्योजातेन मन्त्रेण आवाहनं प्रकल्पयेत् ।
वामदेवेन संस्थाप्य अघोरेणैव तत्पे तु ।
पाद्यमाचमनं पाद्यर्घं व्योममन्त्रेण दापयेत् ।
अष्टत्रिंशत्कलायोगमीशं बीजाद्धृदि न्यसेत् ।
प्राणप्रतिष्ठामन्त्रेण हृदयेन तु चिन्तयेत् ।
वेदिकां कुंभमुद्धृत्य ईशानेनाभिषेचयेत् ।
गौरीगायत्रीमन्त्रेण शक्तिकुंभाभिषेचयेत् ।
घृते क्षीरार्णवं कुर्यात्स्नापयेत्तु शिवांभसा ।
विघ्नेशकुंभमुद्धृत्य स्वस्वमुद्राभिषेचयेत् ।
११.८ घृतक्षीरार्णवं सूक्ष्मे प्रतिपादितं तद्यथा —:
घृते क्षीरार्णवं वक्ष्ये शृणुत्वं तत्र भंजन ।
स्थलाभिषेकपूर्वे वा जीर्णोद्धारस्य पूर्वके ।
घृते क्षीरार्णवं कुर्यात् विधिनानेन बुद्धिमान् ।
प्रासादस्यैव दिग्भागे पश्चिमे चोत्तरेऽपि वा ।
गोमयालेपनं कृत्वा पिष्टचूर्णैर्विचित्रयेत् ।
पुण्याहं वाचयित्वा च स्थानं शुद्धिं ततः कुरु ।
स्थण्डिलं कारयेद्धीमान् आढकद्वयशालिभिः ।
अभ्यर्च्य गन्धपुष्पाद्यैः पूर्वोक्तविधिना ततः ।
स्थानपीठस्य तत्पूर्वे विन्यसेद्द्रव्यसंयुतम् ।
तण्डुलेन समापूर्य स्थालिकोपरि विन्यसेत् ।
यथालाभं समानीय शुद्धं कपिलाघृतम् ।
होमादिपात्रे संग्रह्य विन्यसेत्तण्डुलोपरि ।
तत्पूर्वे हेम पुष्पञ्च दूर्वाग्रं दक्षिणे न्यसेत् ।
अंकुरं पश्चिमे न्यस्त्वा चोत्तरे तु पिवाक्षतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अर्चयेद्गुरुमन्त्रेण गन्धपुष्पादिना बुधः।
घृतसूक्तं जपेत्पूर्वं मन्त्रं पञ्चाक्षरं तथा।
घृतपात्रादि सर्वं वा हीये शिष्यमूर्धनि।
ग्रामप्रदक्षिणं कृत्वा सर्वा--लङ्कारसंयुतम्।
देवाग्रे स्थापयेद्विद्वान् घृतपात्रादिकं यथा।
पुण्याहं वाचयेत्तत्र आत्मानं शान्तिरूपकम्।
भावयेद्गौरि हस्तं च दक्षपाणि तले बुधः।
अभ्यर्च्य देविगायत्रि यागं च मण्डलसंयुतम्।
५०० घृतं संग्राहयेद्विद्वान् कारसंपूर्णमानसम्।
घृतं मिनिक्षामन्त्रेण स्नापयेत्तु बिम्ब शिष्यमूर्धनि।
शर्वं शिवा -- भक्त्या सामन्यविधानतु।
दूर्वाग्रं हेम पुष्पञ्च अपक्षुरं चाक्षतं क्रमात्।
कूर्चादीदर्वं द्विजहृदये योजयेन्मूलमन्त्रतः।
शिवोऽहं भावयेद्विद्वान् गौर्या चैवं विधानतः।
धूपदीपं ततो दत्वा क्षमस्वेति प्रणामयेत्।
सर्वमङ्गल कार्यादिष्वेवं घृताशीर्वचनम्।

गौरि बिम्बानां जीर्णोद्धारविषये गौरी संकोचः कर्तव्यः।
तद्विधानम् सूक्ष्मे -:

गौरी संकोचनं वक्ष्ये शृणुत्वं तत्प्रभंजन।
आयुरारोग्य जयदं पुत्रपौत्रसमृद्धिदम्।
आद्यं द्वितीयमाद्यं तु द्विविधं तरुणालयम्।
कर्षणाभ्यर्चनान्ते तु तरुणालय संग्रहः।
प्रासादे पतिते भिन्ने लिंगे चंचलते तथा।
अन्यानि सर्वकर्माणि कथितानि तथैव च।
देवबालगृहं चेत्तु कुमारं परिकल्पयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

देवीनामायतनं स्थाप्य ... ला क्रमम् ।
बालालिंगं विदित्वैवं बालदेवि विधिं शृणु ।
देवोक्तकालेन कर्म देव्याश्चापि समाचरेत् ।
मन्त्रभेदो भवेदत्र क्रिया भेदो न विद्यते ।
आमिकोशाश्रके वापि दक्षिणे चोत्तरेऽपि वा ।
ईशे वा पश्चिमे वापि गौरी बाला गृहेऽपि वा ।
स्थापयेद्बालरूपिण्यौ सम्पूज्य शिवपूजिते ।
50b बालि होमादिकं विना ॥
पृथक् बालगृहं चेत्तु देवी पूजोक्तमार्गतः ।
समभ्यर्च्य महादेवी मन्त्रेणैव तु देशिकः ।
क्षीरधारावसाने वा छत्रारोपणान्तिके ।
कूर्चोष्टिकावसाने वा प्रोक्षणं सम्यगाचरेत् ।
किञ्चिदस्मिन् विशेषोक्ति शृणुत्वं तत्र भंजन ।
देवि-बाल प्रतिष्ठा चेत् देवस्य तरुणालये ।
देवालयं समावाद्य गौरीं संस्थापयेद्बुधः ।
शिवसंप्रोक्षणं कृत्वा ततः कल्याणमाचरेत् ।
गौरीं संस्थापयेत्पूर्वं शिवसंप्रोक्षणं भवेत् ।
तदा बालालये नारीं समाकृष्य शिवालये ।
देवाग्रे मण्डपे त्वीशे नैरृते वायुगोचरे ।
दक्षिणे ... स्थाप्य पूर्वमार्गेण देशिकः ।
प्रदक्षिणं जले बालनयनोन्मीलन क्रमम् ।
अंकुरं कौतुकं चैव स्पर्शनं कौतुकं विना ।
देव्यग्रे स्थण्डिलं कृत्वा शिवाग्निं विधिना नयेत् ।
गौरीमावाह्य तन्मध्ये मूलेनैव शतं हुनेत् ।
अघोरेण शतं हुत्वा सान्निध्यजपेन देशिकः ।
होमान्ते स्थापयेद्गौरीं पूर्ववर्णितवर्त्मना ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

देवालयजन्मादौ तु प्रोक्षणं सम्यगाचरेत्।
पूजयित्वा विधानेन पश्चात्कल्याणमाचरेदिति॥

ननु उक्तोयं प्रतिमाजीर्णोद्धारः शैवप्रतिमानामेव विनायकस्कन्दपरिवाराणां कथमिति चेत्। उच्यते-
51a सर्वत्रापि आलयोक्तजीर्णोद्धारप्रकारेणालयस्य प्रतिमोक्तप्रकारेणैव प्रतिमानां तथाचोक्तं कारणे-:

परिवारालये जीर्णे आलयस्योक्तवत्कुरु।
पूर्वाकृत्या पुनः कृत्वा लक्षणेन विचक्षणः।
अन्याकृत्या कृतं चेत्तु सर्वदोषसमुद्भवेत्।
स्थापकेनोक्तदेशे तु तद्विनास्वमतन्त्रकैः।
उक्तस्थानप्रकर्तव्यं परिवारादिकं क्रमात्।
जीर्णेन वाग बिम्बेतु उरोन्तरविशेषतः।
तत्तद्धामाग्रके पीठं कृत्वा मूर्तिं समर्चयेत्।
स्थापनोक्तक्रमेणैव बिम्बं वै स्थापयेन्नवम्।

इति॥ एवं जीर्णोद्धारप्रकारमुक्त्वा तत्फलमाह- प्राप्यते इति। तानि च शुभानि सर्वज्ञानोत्तरे प्रतिपादितानि। यथा-

सर्वज्ञ तपोदान सर्वतीर्थेषु यत्फलम्।
तत्फलं कोटिगुणितं स्थाप्य लिङ्गं लभेन्नरः।
यो लिङ्गं स्थापयेद्देवं विधिपूर्वं सदक्षिणम्।
सर्वागमोदितं पुण्यं कोटिकोटिगुणं भवेत्।
पितृजं मातृजं वापि पितृभ्रातृकृतं स्त्रियम्।
कुलैकवंशमुद्धृत्य ततो गच्छेत्परां गतिम्।
अज्ञात्वा विधिवच्छास्त्रं कुरुते यस्तु लोभतः।
कर्तारं च तथात्मानं सहमुक्ता च नाशयेत्।
तस्मात्सर्वप्रयत्नेन विधिवत्कारयेद्बुधः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कर्ता कारयिता चैव तौ याति परांगतिम् ।

51.6. अंशुमति । आयुष्करं पुष्टिकं च श्रीकरं च यशस्करम् ।

सर्वसम्पत्करं चैव सर्वपापविनाशनम् ।

सायुज्यं लभते सत्यं पुनर्जन्म न विद्यते ।

कारणे :- शर्वं यः कुरुते मर्त्यो लभते मोक्षकं फलम् ।

इहैव पुत्रवान् श्रीमान् सोन्ते सायुज्यमाप्नुयात् ।

परं शिवं कृदे कृदे परिविकृष्य शैवागमान्यथामति मयाकृतं शिवकृपाकटाक्षप्रिया ॥

परीक्ष्य च परिग्रह्य वितन्वतामिति प्रार्थना न वा इह

सज्जनस्वकीया वाङ्मनो दायिका ॥

इति जीर्णोद्धारे तृतीय दशक व्याख्या समाप्ता ॥

श्री अन्नपूर्णाम्बा समेत श्री काशीविश्वेश्वरस्वामि सहायः ॥

श्री ज्ञानप्रसूनाम्बा समेत श्री कालहस्तीश्वर स्वामिने नमः ॥

Center for Shaiva Studies, Pondicherry Collection